SEMUSHI

# शेमुषी

Volume - XV /ISSUE - 2 *Bi-monthly News Letter* July to September-2019

वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम।
स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा।। (ऋग्वेदः १०.८१.७)

***Let us, this day, invoke for our protection of the Lord of Speech, the Creator of all, who is swift as thought; may He, the Bestower of all happiness, the doer of good works, be propitiated by all our oblations, (so as) to grant us his protection. (Rgveda 10.81.7)***

---



मान्यानां मानवसंसाधनविकासमन्त्रालयमन्त्रिवर्याणां श्रीरमेशपोखरियाल"निशङ्क"महोदयानां स्वागतं विधीयते विद्यापीठस्य महामान्यकुलाधिपतिभिः श्रीनीडामङ्गलं गोपालस्वामिवर्यैस्तथा मान्यैः कुलपतिभिः आचार्य मुरलीधरशर्मभिः


## राष्ट्रियसंस्कृतविद्यापीठम् :: तिरुपतिः

## RASHTRIYA SANSKRIT VIDYAPEETHA

**(Deemed to be University)**
**Accredited with CGPA of 3.71 on 4 point scale by NAAC (Cycle-2)**
**Categorized in 1st Category among Indian Deemed Universities by the UGC**
**Tirupati, Andhra Pradesh**
**PIN - 517 507**

# अतिथिसत्कार:

**तिरुपतिश्रीवेङ्कटेश्वरस्वामिन: पादतले विराजितं परमपावनप्राङ्गणं राष्ट्रियसंस्कृतविद्यापीठं प्रति समागतानामतिथीनां विशिष्टविदुषां यथोचितस्वागतं सम्माननं च मान्यै: कुलपतिभि: विहितम् ।**



मान्यै: कुलपतिभि: सम्मान्यन्ते अनुसूचितजनजाति-आयोगस्य अध्यक्षवर्या: **श्रीनन्दकुमारसाईमहोदया:** ।



राष्ट्रियसंस्कृतविद्यापीठे नवीनतया समुद्घाटितस्य अभिनयकलाविभागस्य प्रारम्भिककार्यक्रमे मुख्यातिथिरूपेण समागतानां **मुक्तेश्वररावुमहोदयानां** सम्माननं कुर्वन्त: कुलपतय: ।



संस्कृतनवरात्रमहोत्सवसन्दर्भेषु मान्यै: कुलपतिभि: संस्कृतभारत्या: अखिलभारतीयप्रकाशनप्रमुखा: **श्रीसत्यनारायणमहाभागा:** संस्कृतसेवाव्रतित्वेन सम्मानिता: ।




संस्कृतनवरात्रसन्दर्भेषु पद्यानुगुणं चित्रलेखनमिति कार्यक्रमे समर्च्यन्ते मान्या: विशिष्टचित्रशिल्पिन: श्रीसिङ्गंपल्लीसत्यनारायण-महोदया: । सम्मानयन्ति मान्या: कुलपतय: ।



विद्यापीठस्य विविधभाषापरिषदां समुद्घाटनावसरे कुलपतिभि: सत्कृता: तिरुपतितिरुमलदेवस्थानानां विशेषाधिकारिण: श्रीधमरिड्डिमहोदया: ।



कुलपतिभि: सम्मानिता: संस्कृतस्य वरिष्ठा: विद्वांस: व्याकरणशास्त्रनिपुणा: श्रीजनार्दनहेगडेमहोदया:





## ।। कुलपतिसन्देश: ।।



## संस्कृतशिक्षणरङ्गे प्राविधिकशास्त्रम्
## (Technology in Sanskrit Teaching Field)

संस्कृतभाषाशिक्षणम् अहोस्वित् संस्कृतशास्त्रशिक्षणं कक्ष्याप्रकोष्ठमात्रकेन्द्रितमिति भाव: सामान्यजन-मानसेषु बहो: कालात् प्रतिष्ठितोऽस्ति । एतत्तथ्यं न सत्यदूरम् ।

साम्प्रतं संस्कृतं तन्निष्ठशास्त्राणि च अध्येतुकामा:, संस्कृतवाङ्मयनिष्ठविज्ञानानि अनुसन्धित्सव: छात्रा: विद्वांसश्च संसारे क्रमश: वर्धमानास्सन्ति । एवञ्चेत् कक्ष्याप्रकोष्ठमात्रसीमितं संस्कृतशास्त्रशिक्षणम् ईदृशान् अधीतिन: जिज्ञासून् च तर्पयितुं नालमेव । अतो हेतो: संस्कृतशिक्षणस्य विकासाय विस्ताराय च बहुमुखप्रविधय: समाश्रयणीया: । अत्र प्राविधिकम् अतिवेलमुपकरोतीत्यंश: निर्विवाद: सर्वादरणीयश्च ।

संस्कृतसंवर्धनप्रतिष्ठानस्य न्यासिन: संस्कृतप्रचाररङ्गे प्रथितयशस्कस्य श्रीचमूकृष्णशास्त्रिमहोदयस्य प्रयत्नविशेषै: टाटापरामर्शनसेवासंस्थाया: (Tata Consultancy Service) अधिकारिण: आत्मन: अयान्प्राविधिकवेदिकायां (ion Platform) संस्कृतविषयशिक्षणार्थं निश्शुल्कम् अवसरान् कल्पयिष्यन्तीति संस्कृतलोकानाम् अत्यन्तमोदावहो विषय: ।

मासेऽस्मिन् विंशतितमे दिनाङ्के बेङ्गळूरुनगरे त्रयोदशानां संस्कृतविश्वविद्यालयानां कुलपतीनां समक्षं Sanskrit Hub नाम्नी वेदिका टाटासंस्थाया: पूर्वाधिकारिणा श्रीरामस्वामिमहोदयेन उदघाटि । नैके संस्कृतविश्वविद्यालया: वेदिकायामस्यां स्वीयकार्यक्रमान् सञ्चालयिष्यन्तीति अत्यन्तानन्दकरो विषय: । राष्ट्रियसंस्कृतविद्यापीठं महता उत्साहेन वेदिकामिमाम् उपयोक्तुं नैकान् कार्यक्रमान् निरूप्य अमुष्मिन् ऐतिहासिके घट्टे आत्मन: सामर्थ्यं प्रकाशयिष्यति ।

मुरलीधर:

(वि.मुरलीधरशर्मा)

# सर्वेषां कृते वैदिककक्षा: (Vedic Classes for All)



सम्पूर्णेऽस्मिन् विश्वे यावत्य: भाषा: यावत्य: विद्या वा समुपलभ्यन्ते तासु भाषासु विद्यासु च वेदा: अत्यन्तं प्राचीना इति नास्ति लेशतोऽपि संशय: । सर्वेषां जीवानामुपकाराय एव वेदा: विलसन्त्यस्मिन् संसारे । तस्यैव भगवत: नि:श्वासभूतस्य अभ्युदयनि:श्रेयसहेतुभूतस्य चतुर्विधपुरुषार्थप्रापकस्य वेदस्य संरक्षणाय संवर्धनाय च भारतसर्वकारेण संस्थापितं महर्षिसान्दीपनीराष्ट्रियवेद-विद्याप्रतिष्ठानमिति, यया संस्थया सार्वभौमिक-सार्वजनीनप्रसाराय विविधा: कार्यक्रमा: समनुष्ठीयन्ते ।

अस्मिन्नेव क्रमे सर्वेषां वेदतत्त्वज्ञानाय उज्जैनस्थप्रतिष्ठानेनानेन प्रदत्तवित्तसहयोगेन राष्ट्रियसंस्कृतविद्यापीठस्य वेदभाष्यविभागपक्षत: **“सर्वेषां कृते वेदशिक्षा”** (Vedic Studies for All) इति अभिनव: प्रकल्प: कश्चन परिचाल्यते ।

अस्मिन् प्रकल्पे अध्यापनविषयसारण्यामधोलिखिता अंशा: भवन्ति । यथा —

**(A) वेदा:** — (१) वैदिकसाहित्यस्य सर्वेक्षणम् — संहिता, ब्राह्मणम्, आरण्यकम्, उपनिषत् । (२) वैदिकसूक्तानि – अग्निसूक्तम्, इन्द्रसूक्तम्, पुरुषसूक्तम्, संज्ञानसूक्तम्, देवीसूक्तम्, शान्त्यध्याय:, शिवसङ्कल्पसूक्तम्, भूमिसूक्तम् । (३) उपनिषद्वार्ता: — ईशोपनिषत्, तैत्तिरीयोपनिषत् (शिक्षावल्ली), छान्दोग्योपनिषत् । (४) कठोपनिषत् (यम-नचिकेतसो: संवाद:) (५) बृहदारण्यकोपनिषत् (मैत्रेयी-याज्ञवल्क्यसंवाद:)

**(B) वेदाङ्गानि** — शिक्षा, कल्प:, व्याकरणम्, निरुक्तम्, छन्द:, ज्योतिषम् । संस्कृतव्याकरणम् ।

**(C) इतिहासपुराणानि (तत्र वैदिकविचारा:)** — (१) रामायणम् (विषयवस्तु, साहित्यिकसौन्दर्यम्) (२) महाभारतम् (विषयवस्तु, विदूरनीति:, यक्ष-युधिष्ठिरसंवाद:) (३) श्रीमद्भगवद्गीतादर्शनम् (४) श्रीमार्कण्डेयपुराणम्, श्रीमद्भागवतपुराणञ्च ।

**(D) लौकिकसाहित्यस्य वेदानामुपरि प्रभाव:** — (१) कालिदास: (२) माघ-भारवि-श्रीहर्ष-भट्टिसाहित्यम् (३) गीतिकाव्य-स्तोत्रकाव्यसाहित्यम्, भक्तिस्तोत्रसाहित्यं च ।

**(E) वेदभाष्यकाराणां परिचय:** — (१) सायण: (२) उवट: (३) दयानन्द: (४) अरविन्द: (५) परवर्तिभाष्यकारा: (६) पाश्चात्त्यभाष्यकाराश्च ।

**(F) भारतीयदर्शनपरम्पराया: वैदिकाधारा:** — (१) चार्वाक-दर्शनम् (२) मीमांसादर्शनम् (३) सांख्यदर्शनम् (४) योगदर्शनम् (५) न्याय-वैशेषिकदर्शने (६) शैवपरम्परा (७) वेदान्तदर्शनधारा — अद्वैत-द्वैत-विशिष्टाद्वैत-द्वैताद्वैत-अचिन्त्यभेदाभेदा: ।

**(G) वैदिकसंस्कृति:** — (१) विश्वसंस्कृतौ वैदिकसंस्कृते: प्रभाव: (२) मानवताया: कृते वेदशिक्षा — मानवीयनिपुणता, विश्वशान्ति:, विश्वभ्रातृत्वम्, परिवेशसन्तोलनम्, वेदा: मानवाधिकाराश्च ।

**(H) वैदिकसाहित्यस्य प्रादेशिकभाषासाहित्ये प्रभाव:** — (१) जयदेवस्य गीतगोविन्दम् (२) भारतीयसंस्कृते: प्रतिनिधि: रवीन्द्रनाथटैगोर: (३) शान्तिनिकेतनस्योपरि प्रबन्ध: (४) कृत्तिवास:, काशीरामदासश्च (५) तुलसीदास: (६) रामकृष्ण-विवेकानन्दान्दोलनम् - वैदिकसंस्कृते: प्रव्यक्ति: ।

एतस्य कार्यक्रमस्य शुभसमुद्घाटनम् ऐषम: अगष्टमासस्य सप्तमदिनाङ्के (07.08.2019) मान्यकुलपतीनां **मुरलीधरशर्म-महोदयानाम्** आध्यक्ष्ये, तथा श्रीवेङ्कटेश्वरवेदविश्वविद्यालयात् समागतानां वेदविद्यानिष्णातानां **डॉ.के.हनुमत् शर्म**महोदयानां च मुख्यवक्तृत्वे समुदघाटि । अध्यक्षा: आधुनिकसमाजे वेदस्य प्रयोजनीयतामाविष्कृत्य तेषां स्वरूपं वैशिष्ट्यं च उल्लिख्य एतस्मिन् कार्यक्रमे भागग्रहीतॄणां वेदविद्यां प्रति बद्धादराणां संस्कृत-संस्कृतेतरजनानां च कृते कार्यक्रमोऽयमत्यन्तमुपादेयो भविष्यतीति प्रत्यपादयन् । मुख्यवक्तृत्वेन समुपस्थिता: डॉ.शर्ममहोदया: वेदानां महत्त्वमुक्त्वा वेदशिक्षणकौशलं प्राबोधयन् । सभाया: सञ्चालनं कार्यक्रमस्य संयोजकेन तथा वेदभाष्यविभागमुख्येन **डॉ.निरञ्जनमिश्र-महोदयेन** कृतम् । अस्यां वेदाध्ययनशालायां तिरुपतिस्था: साधारणनागरिका: विद्यापीठेऽधीयानाश्च छात्रा: आहत्य **द्विशतसंख्यातीता:** नामपञ्जीकरणमकुर्वन् ।







प्रतिशनिवासरं रविवासरे, अवकाशदिनेषु च एतदर्थं कक्ष्या: वेदविद्याप्रतिष्ठानस्य निर्धारितनियमानुगुणं प्रचलन्ति । अगष्टमासात्प्रारभ्य अद्यावधि विंशति: कक्ष्या: सम्पन्ना: । अत्र विद्यापीठस्य वरिष्ठा: प्राचार्या:, अध्यापका:, बहिस्थाच्च समाहूता: विद्वांस: स्वीयबहुमूल्योपन्यासान् प्रास्तुवन् । यथा -

| *समाहूता: विद्वांस:* | *विषय:* |
|---|---|
| आचार्य एम्.एल्.एन्.मूर्त्ति: | तैत्तिरीयोपनिषत्, छान्दोग्योपनिषत् |
| वेदविद्वान् श्रीकृष्णश्रौती | संहितावैशिष्ट्यम् |
| डॉ.के.वी.हनुमत् शर्मा | संहिता-ब्राह्मण-आरण्यकपरिचय: |
| आचार्य श्रीपादभट्ट: | ज्योतिषसिद्धान्ता: |
| आचार्य के.विश्वनाथ: | कठोपनिषत्, बृहदारण्यकोपनिषत् |
| डॉ.यशस्वी | वेदाङ्गव्याकरणम्, व्याकरणवैशिष्ट्यम् |
| डॉ.निरञ्जनमिश्र: | शिवसङ्कल्पसूक्तम् |
| डॉ.भारतभूषणरथ: | गीतायां वैदिकसन्दर्भा: |
| डॉ.सपनकुमारपण्डा | कल्पशास्त्रम् |
| पण्डितदुर्गाशरणरथ: | शिक्षापरिचय:, निरुक्तम् |
| डॉ.सोमनाथदाश: | रामायणविषयवस्तु तथा तस्य साहित्यिकसौन्दर्यम् । |











# पारिषदचर्चासत्राणि

मान्यकुलपतीनां प्रोत्साहनेन विद्यापीठीयप्राचार्योपाचार्यसहाचार्याणां नवीनज्ञानविज्ञानविषये चर्चां विधातुं प्रतिमासं प्रचाल्यमाने पारिषदमिति कार्यक्रमे विद्यापीठस्य वेदवेदाङ्ग-साहित्यसंस्कृति-शिक्षा-दर्शनसङ्कायेभ्य: वरिष्ठा: अध्यापका: स्वीयनवीनानुसन्धानमूलकानि व्याख्यानानि प्रास्तुवन् । येन अध्यापकेषु विविधविषयान् आधारीकृत्य गवेषणात्मकचर्चां कर्तुं कश्चन शुभावसर: प्राप्त आसीत् । तत्र सङ्कायक्रमेण अध्यापकानां चर्चाविषया: अधोलिखिता आसन् ।

**— वेदवेदाङ्गसङ्काय: —**

१) आचार्य: श्रीपादभट्ट: – श्रीरामजन्मकाल: (ज्योतिषम्) ।
२) डॉ.कृष्णेश्वरझा – अधिकमासानयनम् (ज्योतिषम्) ।
३) डॉ.केशवमिश्र: – लग्नविचार: (ज्योतिषम्) ।
४) डॉ.यशस्वी – कर्तरि कर्मणि प्रयोगा:, य: कर्मणि इत्यादिसूत्रार्थविचार: (व्याकरणम्) ।
५) डॉ.निरञ्जनमिश्र: – “सहस्रशीर्षा ...” इति मन्त्रार्थविचार: (वेदभाष्यम्) ।
६) दुर्गाशरणरथ: – वेदवैशिष्ट्यम् (वेदभाष्यम्) ।
७) शिवशङ्करहोता – वेदभाष्यविचार: (वेदभाष्यम्) ।
८) डॉ.रमेशवावु – Mathematics Model (गणितविभाग:) ।
९) डॉ.चन्दुलाल एम्. – Matrix (गणितविभाग:) ।
१०) आचार्य आर्.जे.रमाश्री — Search Tools (computer).

**— दर्शनसङ्काय: —**

१) आचार्य के.इ.देवनाथन् - अग्नीषोमीयं पशुमालभते इति वाक्यविचार: ।
२) आचार्य ओ.एस्.आर्.एल्.शर्मा – हेत्वाभाससामान्यलक्षणम् ।
३) आचार्य नरसिंहाचार्यपुरोहित: – सर्वेषां पदानां भगवद्बोधकता ।
४) आचार्य एम्.एस्.आर्.एस्.शर्मा - अज्ञानसाधनम् ।
५) डॉ.डि.ज्योति: - क्रियायोग: ।
६) डॉ.टि.एस्.आर्.नारायण: – आनर्थक्यात्तदङ्गेषु ।
७) डॉ.पि.टि.जि.रङ्गरामानुजाचार्युलु – पाञ्चरात्रागमे प्रायश्चित्तानि ।
८) डॉ.जे.श्रीनिवास: – सहशब्दार्थ: ।

**— शिक्षासङ्काय: —**

१) डॉ.आर्.चन्द्रशेखर: – संस्कृतशिक्षणस्य सामान्यसिद्धान्ता: ।
२) आचार्य के.कदाम्बिनी – Root Bricks.
३) डॉ.एस्.मुरलीधरराव: – छात्राणां व्यक्तित्वविकासे कारकाणि ।
४) डॉ.सच्चिदानन्दमूर्त्ति: – मनोविज्ञानशास्त्रे मानवतावाद: ।
५) आचार्य एन्.लता – सङ्गसंस्कर्तॄणां परिचय: ।
६) आचार्य प्रह्लाद आर्.जोशी – अधिगमसिद्धान्त: ।
७) आचार्य रजनीकान्तशुक्ल: – शिक्षणे पाठयोजनापदविश्लेषणम् ।

**— साहित्यसंस्कृतिसङ्काय: —**

१) आचार्य राणीसदाशिवमूर्त्ति: – काव्यस्यात्मा सौन्दर्यम् ।
२) आचार्य सि.रङ्गनाथन् – पादुकासहस्रे चित्रपद्धति: । (Cont. Page.9)

# संस्कृतनवरात्रमहोत्सवः
## 14.08.2019 to 22.08.2019





संस्कृतनवरात्रमहोत्सवसन्दर्भे विद्यापीठस्य परमपावनप्राङ्गणे स्वागतीक्रियन्ते मान्याः मन्त्रिणः श्रीरमेशपोखरियालमहोदयाः, मान्याः कुलाधिपतयः श्रीनीडामङ्गलं गोपालस्वामिवर्याः तथा अन्ये अतिथयः (वामभागचित्रे) । मान्यैः मन्त्रिभिः कुलाधिपतिभिश्च उत्सवस्य समुद्घाटनं क्रियते प्रदीपप्रज्वलनेन (दक्षिणचित्रे) ।

संस्कृतभाषां लोकभाषात्वेन समेधयितुं प्रतिवर्षमिव ऐषमोऽपि केन्द्रसर्वकारस्य निर्देशमनु तिरुपतिस्थे राष्ट्रियसंस्कृतविद्यापीठे संस्कृत-सप्ताहस्थानिकः संस्कृतनवरात्रमहोत्सवो महता वैभवेन पर्यपाल्यत । अगस्तमासस्य चतुर्दशात् दिनाङ्कात् द्वाविंशं दिनाङ्कं यावत् नव दिनानि कार्यक्रमोऽयं परिव्याप्तः । १४.०८.२०१९ दिनाङ्के महतोऽस्य कार्यक्रमस्य उद्घाटनसमारोहे भारतसर्वकारस्य मानवसंसाधनविकास-मन्त्रालयस्य केन्द्रमन्त्रिणः मान्याः **डॉ.रमेशपोखरियाल "निशङ्क"**महोदयाः मुख्यातिथिपदं व्यभूषयन् । राष्ट्रियसंस्कृतविद्यापीठस्य कुलाधिपतयः, पद्मभूषणबिरुदाङ्किताः मान्याः **श्री नीडामङ्गलं गोपालस्वामिमहाभागाः** उद्घाटनसमारोहस्याध्यक्ष्यं निरवहन् । विद्यापीठस्य कुलपतयः आचार्याः



**वि.मुरलीधरशर्ममहोदयाः** समारोहेऽस्मिन् सर्वेक्षकत्वेन व्यराजन्त । मान्याः केन्द्रमन्त्रिणः संस्कृतनवरात्रमहोत्सवस्य उद्घाटनेन सह विद्यापीठे नूतनतया अनुवादविभागम्, अभिनयकलाविभागञ्च समुदघाटयन् । अपि च कक्ष्याप्रकोष्ठसमुदायस्य, वेङ्कटाचलच्छात्रावासस्य, जलशुद्धीकरण-योजनायाश्च शिलान्यासमकुर्वन् । अस्मिन् समारोहे मान्यैः मन्त्रिवर्यैः हिन्दीभाषायां विरचितस्य **"कोई मुश्किल नहीं"** इति नाम्नः ग्रन्थस्य संस्कृतानुवादः **"किमपि दुष्करं नहि"** इति लोकार्पणीभूतः । अयमनुवादः विद्यापीठस्य कुलसचिवैः **प्रो.जी.एस्.आर्.कृष्णमूर्त्तिमहाभागैः** कृतः । युगपदेव विद्यापीठस्य शोधपत्रिकायाः महस्विन्याः, वृत्तपत्रिकायाः शेमुष्याः, English Reader इति आंग्लग्रन्थस्य च लोकार्पणमभवत् । समारोहेऽस्मिन् संस्कृतभारत्याः अखिलभारतीयप्रकाशनप्रमुखाः **श्रीसत्यनारायणमहाभागाः** संस्कृतसेवाव्रतित्वेन सम्मानिताः । समारोहस्यास्य प्रधानसञ्चालकाः **डॉ.नारायणवर्या** आसन् । **डॉ.यशस्विवर्यः, डॉ.सच्चिदानन्दमूर्त्तिवर्यश्च** सहसञ्चालकौ आस्ताम् ।

चतुर्दशदिनाङ्के सायाह्ने **"पद्यवाचनानुगुणं चित्रलेखनम्"** इति कार्यक्रमः प्रवृत्तः, यत्र सुप्रसिद्धाश्चित्रकाराः **श्रीसिङ्गंपल्लिसत्यनारायण-महोदयाः** संस्कृतपद्योक्तविषयभावयोरनुगुणं चित्रलेखनमकुर्वन् । विद्यापीठस्य शैक्षणिकसङ्कायप्रमुखाः **प्रो.राणीसदाशिवमूर्त्तिमहाभागाः** अत्र पद्यान्यपठन् ।









पञ्चददशे दिनाङ्के सायं संस्कृतकवितासङ्गोष्ठी प्रवृत्ता, यत्र विद्यापीठस्य अध्यापकाः, शोधच्छात्राश्च सोत्साहं भागमगृह्णन् । इह कुलसचिवाः **प्रो.जि.एस्.आर्.कृष्णमूर्त्तिमहोदयाः** आध्यक्ष्यं निरवहन् । **डॉ.सोमनाथ-दाशवर्याश्च** अत्र सञ्चालका आसन् ।

षोडशे दिनाङ्के तिरुपतिनगरस्य एकादशसु केन्द्रविद्यालयेषु राज्यविद्यालयेषु च विद्यापीठेन संस्कृतस्पर्धाः समायोजिताः, यत्र सप्तशताधिकाः (७००) विद्यालयच्छात्राः सोत्साहं भागमगृह्णन् । आसां संस्कृतस्पर्धानां सञ्चालकाः शैक्षिकसङ्कायप्रमुखाः **प्रो.रा.प्रह्लादजोशी-महाभागा** अभवन् ।

सप्तदशे दिनाङ्के श्रीमद्भगवद्गीतावधानं सञ्जातम्, यत्र शास्त्रिप्रथमवर्षच्छात्रः **आयुष्मान् उमामहेश्वरराव**ः कृत्स्नायाः भगवद्गीतायाः अवधानं कृत्वा विदुषामाशिषः प्राप्नोत् । एतस्यावधानकार्यक्रमस्याध्यक्ष्यं निरवहन् विद्यापीठस्य वरिष्ठाचार्याः **प्रो.एम्.एल्.नरसिंहमूर्त्तिमहोदयाः** । सञ्चालनञ्चाकुर्वन् **प्रो.सि.राघवन्वर्याः** ।

अष्टादशदिनाङ्के भजनसन्ध्या, भरतनाट्यञ्च प्रवृत्तम्, यत्र विद्यापीठ-च्छात्राः भरतनाट्यप्रस्तुत्या स्वीयां प्रतिभां, भजनकीर्त्तनेन स्वीयां भक्तिं च प्राकटयन् ।

उनविंशे दिनाङ्के विद्यापीठच्छात्राणां शैक्षिक-सांस्कृतिकस्पर्धाः प्रवर्तन्त, यत्र शताधिकाश्छात्राः भागमगृह्णन् । तत्र शैक्षिकस्पर्धानां सञ्चालकाः **डॉ.मुरलीधरराववर्याः, डॉ.राधागोविन्दत्रिपाठिमहाशयाः, डॉ.प्रदीपबागवर्याः, डॉ.नन्दनभट्टवर्याश्च** आसन् । **डॉ.लीनाचन्द्रा-डॉ.जे.बलिचक्रवर्तिवर्याश्च** सांस्कृतिकस्पर्धानां सञ्चालनमकुर्वन् ।

विंशे दिनाङ्के संस्कृतवस्तुप्रदर्शिनी आयोजिता, यत्र प्रायो द्विशतानां दैनन्दिनजीवनोपयोगिवस्तूनां संस्कृतनामानि तत्तद्वस्तुना सह प्रदर्शितानि । अत्र च तत्तद्वस्तुनो नामस्मरणस्पर्धाऽपि प्रवृत्ता ।

एकविंशे दिनाङ्के संस्कृतशास्त्राणामैतिह्यमिति विषयमधिकृत्य अखिलभारतीया शोधसङ्गोष्ठी सम्पन्ना, यत्र अध्यापकाः शोधच्छात्राश्च शताधिका भागमगृह्णन् । **प्रो.सिहेच्.पि.सत्यनारायणवर्याः, प्रो.राधाकान्तठाकुरवर्याः, प्रो.के.गणपतिभट्टवर्याश्च** सत्राणामाध्यक्ष्यं निरवहन् । **प्रो.सत्यनारायण आचार्यमहोदयाः, प्रो.के.सूर्यनारायण-महाशयाः, डॉ.सोमनाथवर्याश्च** सत्राणां सञ्चालनमकुर्वन् ।

द्वाविंशे दिनाङ्के पूर्वाह्णे रसप्रश्नस्पर्धा सञ्जाता । एतस्या अध्यक्षाः **प्रो.उन्नीकृष्णन्नम्पियातिरिवर्याः**, सञ्चालकाश्च **प्रो.सि.रङ्गनाथन्महोदयाः** आसन् ।

द्वाविंशे दिनाङ्के अपराह्णे महतः संस्कृतनवरात्रस्य स्वस्तिवाचनिकमहोत्सवः (समापनोत्सवः) समपद्यत । यत्र भाग्यनगरस्य (हैदराबाद्) संस्कृत-अकादम्याः निदेशकाः आचार्याः **नीलकण्ठमहाभागाः** मुख्यातिथित्वेन संस्थिताः । विद्यापीठस्य कुलपतयः आचार्याः **वि.मुरलीधरशर्ममहोदयाश्च** अध्यक्षत्वेन विराजिताः । अत्र संस्कृतनवरात्रोत्सवस्य नानास्पर्धासु प्राप्तपुरस्कारेभ्यः छात्रेभ्यः पुरस्काराः प्रादीयन्त । पुरस्कारप्राप्तृषु चतुष्षष्ट्यधिकशतसङ्ख्याकाः विद्यालयच्छात्राः द्विसप्ततिसंख्याकाश्च विद्यापीठच्छात्राः अवर्तन्त ।

विद्यापीठस्य कुलपतिवर्याणां सर्वेक्षकत्वे प्रवृत्तस्यास्य नवदिनात्मक-कार्यक्रमस्य संयोजकाः **डॉ.नारायणवर्याः**, सहसंयोजकाश्च **डॉ.यशस्विवर्याः, डॉ.सच्चिदानन्दवर्याश्च**ासन् । शोधार्थिनौ परमेश्वर-किरणभट्टौ इह सहायकत्वेन अवर्तेताम् ।











## श्रीमद्भगवद्गीताष्टावधानकार्यक्रम :




श्रीमद्भगवद्गीतायाः अष्टावधानम् एकप्रकारकं धारणासम्बद्धावधानम् । अत्र अष्टौ प्रक्रियाः यथा — श्लोककथनम्, सङ्ख्याकथनम्, पादपूरणम्, अखण्डपठनम्, श्लोकसंख्या, अन्त्याक्षरी, अक्षरदर्शनम्, अप्रस्तुतप्रसङ्गः इति भवन्ति । भगवद्गीताश्लोककथनम्, अध्यायशः श्लोकानां संख्यास्मरणम् । विलोमपठननैपुण्यम्, अध्यायशः श्लोकशः अक्षराणां स्मरणम्, अखण्डपठने धारा, अप्रस्तुतप्रसङ्गे वाक्चातुर्यं चमत्कारवाक्कौशलञ्च नितान्तमपेक्षते । अतः तादृशस्य अवधानस्य कर्तारः विरलाः भवन्ति । राष्ट्रियसंस्कृतविद्यापीठस्य शिक्षाशास्त्रविभागे सहायकाचार्यरूपेण कार्यं कुर्वाणः **डॉ. सच्चिदानन्दमूर्त्तिमहोदयाः** आवासीयशिक्षणरूपेण छात्रेभ्यः गीतावधानप्रशिक्षणं प्रयच्छन्ति । तेषु छात्रेषु श्री उमामहेश्वरः अन्यतमः ।

संस्कृतनवरात्रमहोत्सवं समुपलक्ष्य चतुर्थदिने १७.०८. २०१९ तमे दिनाङ्के श्रीमद्भगवद्गीतावधानकार्यक्रमः समायोज्यत। कार्यक्रमस्यास्य अध्यक्ष्याः प्रो.एम्.एल्.एन्.मूर्त्तिमहोदया आसन् । अमुष्मिन् कार्यक्रमे शास्त्रिप्रथमवर्षीयच्छात्रः य.उमामहेश्वररावः श्रीमद्भगवद्गीतावधानमकार्षीत् । अवधानेऽस्मिन् चतस्रः आवृत्तय आसन् । यत्र च अष्टप्रक्रियाणाम् अष्टौ प्राश्निकाः तत्तत्प्रक्रियानुसारेण अप्राक्षुः । अभिख्या, श्रीविद्या, ममता, कृष्णवेणी, शङ्करः, सुकान्तः, शैलेषः, लक्ष्मीनारायणश्चैमे प्राश्निकाः आसन् । अप्रस्तुतप्रसङ्गः कार्यक्रमस्य रञ्जकः प्रक्रियाप्रकार आसीत् । अन्यासु च प्रक्रियासु अवधानिनः गीतायाः धारणाशक्तिं, धाराशक्तिम्, उच्चारणशैलीं च दृष्ट्वा सन्तुष्टाः सन्तः अध्यक्षाः अवधानिनः उमामहेश्वरस्य सम्माननमकुर्वन् । भगवद्गीतां सर्वेऽपि पठेयुः कण्ठस्थीकरणञ्च तस्याः कुर्युरिति उद्देश्येन एव एतादृशाः कार्यक्रमाः सञ्चाल्यन्ते इति ते अध्यक्षाः वदन्तोऽवधानिनः गीताशिक्षकाणां डॉ.सच्चिदानन्दमूर्त्तिमहोदयानां प्रशंसामभिनन्दनञ्च अकार्षुः । कार्यक्रमस्यास्य सञ्चालकाः डॉ.विद्वान् नारायणमहोदयाः, डॉ.यशस्विमहोदयाः, डॉ.एस्. सच्चिदानन्दमूर्त्तिमहोदयाश्च आसन् ।

## राजभाषानिरीक्षणसमितेः सदस्यानां विद्यापीठपरिदर्शनम्

राजभाषनिरीक्षणसमितेः सदस्याः शिक्षाधिकारिणः **श्री अजय - कुमारवर्यास्**तथा **श्रीदयालकृष्णशर्म**महोदयाः विद्यापीठेऽस्मिन् अगष्टमासस्य ७-८ दिनाङ्कयोः हिन्दीभाषायाः प्रचारप्रसारस्थितिं परिशीलयितुं समागताः । सप्तमे दिनाङ्के सर्वेऽपि सदस्याः ग्रन्थालय-कार्यालय-प्रकाशन-विभाग-विभागीयग्रन्थालयानां निरीक्षणमकार्षुः । ततःपरं विद्यापीठस्य कुलसचिवैः प्रो.जि.एस्.आर्.कृष्णमूर्त्तिवर्यैस्था वरिष्ठैः आचार्यैः प्रो.श्रीपादभट्ट-प्रो.सिहेच्.पि.सत्यनारायण-प्रो.आर्.प्रह्लादजोशीवर्यैः सह समितिसदस्यानां विशिष्टमधिवेशनं प्राचलत् । अन्तिमे दिनाङ्के तुलसिदास-हिन्दीपरिषत्पक्षतः छात्रैस्सह समायोजिते समावेशे समागता अतिथयः हिन्दीभाषायाः विकासार्थं मार्गदर्शनमकुर्वन् । डॉ.लतामङ्गेशमहाभागाः सर्वान् कार्यक्रमान् समायोजयत् ।








## तेलुगुभाषादिनोत्सवः (29.08.2019)



अगस्तमासस्य २९ तमे दिनाङ्के राष्ट्रियसंस्कृतविद्यापीठे तेलुगुभाषादिनोत्सवः उत्साहपूर्णे वातावरणे समाचर्यत । अस्य कार्यक्रमस्य मुख्यातिथयः श्रीवेङ्कटेश्वरविश्वविद्यालयस्य तेलुगुविभागस्य निवृत्ताचार्याः के.सर्वोत्तमरावुमहोदयाः भाषमाणाः प्रत्येकमपि इतरां भाषामात्मनि संयोजयितुं समर्था भाषा तेलुगुभाषा इति उदबोधयन् । सहस्राधिकवर्षात्मिके तेलुगुसाहित्येतिहासे नैकाः प्रक्रियाः प्राचलन्, प्रचलन्त्यश्च सन्ति । सम्प्रति तस्यां दिशि अनुसन्धानात्मकाध्ययनस्य आवश्यकता महती वर्तते । व्यावहारिकी, ग्रान्थिकी, ग्राम्या च इत्येवं बहुविधायाः तेलुगुभाषायाः तत्तत्सन्दर्भेषु प्रयोगः सादरं करणीयः, न तु केवलमेकस्यैवादरः, अवशिष्टेषु च विद्वेषः स्यादिति मुख्यातिथयः प्राबोधयन् ।

सभाध्यक्षत्वेन विद्यापीठस्य शैक्षिकसङ्कायप्रमुखाः आचार्याः राणीसदाशिवमूर्त्तिमहोदयाः समुपास्थापयन् यत्, भाषायां संस्कृत्यां च पर्यवसितं पदजालं तेलुगुपदजालत्वेनैव परिगणनीयम् । तेलुगुभाषा संस्कृतभाषातः महतीं पदसम्पत्तिं समवाप्नोदिति तेषामभिप्राय आसीत् । गौरवातिथित्वेन कुलसचिवाः आचार्य जि.एस्.आर्.कृष्णमूर्त्तिमहाभागाः, श्रीपादसुब्रह्मण्यशास्त्रि-गुरजाडप्रमुखाः, तदितरे च कवयः स्वीयरचनासु व्यावहारिकतेलुगुभाषाया एव अग्रताम्बूलं प्रायच्छन् । साहित्यसंस्कृतिसङ्कायप्रमुखाः आचार्य सिहेच्.पि.सत्यनारायणमहाभागाः अवदन् यत्, व्यवहारे प्रयुज्यमानानाम् आंग्लपदानां स्थाने यावच्छक्यं तेलुगुपदानि प्रयोक्तव्यानि इति । कार्यक्रमेऽस्मिन् स्वागतभाषणं तेलुगुविभागाध्यक्षाभिः डॉ.विजयलक्ष्मीमहाभागाभिः, धन्यवादसमर्पणं डॉ.डि.नल्लन्नवर्यैः, सभासञ्चालनं च डॉ.जि.लक्ष्मीनारायणैः विहितम् । अत्र तेलुगुभिन्नाः छात्रा अपि भागमुद्वा समधिकतया कार्यक्रममभुं सफल्यकुर्वन् ।







## पारिषदचर्चासत्राणि

३) आचार्य आर्.दीप्ता – Kanthapura Novel of Raja Rao ।
४) आचार्य सत्यनारायण आचार्यः – बालसाहित्यम् ।
५) डॉ.भारतभूषणरथः – काव्यगुणाः ।
६) डॉ.विजयलक्ष्मी – नन्नयभट्टस्य नानारुचिरार्थसूक्तिनिधित्वम् ।
७) डॉ.वलिचक्रवर्ती – नीलकण्ठविजयचम्पूकाव्ये मङ्गलश्लोकविचारः ।
८) डॉ.जि.लक्ष्मीनारायणः – तेलुगुभाषायां संस्कृतसमपदानामर्थपरिणामः ।
९) डॉ. प्रदीपकुमारबाग् – कुडुकुभाषायां संस्कृतभाषायाः प्रभावः ।
१०) डॉ.एम्.सुजाता – वरदाभ्युदयचम्पूकाव्यम् ।
११) डॉ.टी.लतामङ्गेष् – अंधेरी नगरी नाटक का परिचय ।
१२) डॉ.श्वेतपद्माशतपथी – प्रतापरुद्रीयग्रन्थे नायकचर्चा ।
१३) डॉ.पारमिता पण्डा – प्रलयचातुर्विध्यम् ।
१४) डॉ.वेदप्रकाश बोरकरः – हिन्दीभाषा का महत्त्व ।
१५) डॉ.लीनाचन्द्रा – साहित्यदर्पणे वाक्यलक्षणम् ।
१६) डॉ.सोमनाथ दाशः — अनुसन्धाने सर्जनात्मकतायाः स्थानम् ।
१७) डॉ.शिवरामभट्टः – "ङमो ह्रस्वात्" इत्यादिसूत्रविचारः ।
१८) डॉ.सिहेच्.नागराजः – व्यतिरेकालङ्कारः ।
१९) आचार्य सिहेच्.पि.सत्यनारायणः – अलङ्कारशास्त्रेषु नवीनतासम्पादनसोपानानि ।

कार्यक्रमसंयोजकः , आचार्यः के.विश्वनाथः



# अभिमन्युबालकेन्द्रकार्यक्रमवैभवम्





मान्यवरकुलपतिमहोदयानां मानसपुत्रत्वेन विकसितस्य अभिमन्युबालकेन्द्रस्य नैके कार्यक्रमा: विद्यापीठे वीद्यापीठाद् बहिश्च सर्वत्र विद्यापीठस्य यशोवैभवं विस्तारयन्ति । शनै: शनै: तिरुपतिनगरे बालेभ्य: जीवनमूल्यम्, भारतीयसंस्कृते: वैशिष्ट्यं च शिक्षयन्ति । अस्मिन् शैक्षिकवर्षे चतुष्षष्टिसंख्याकानि बालकेन्द्राणि प्रतिष्ठापितानि । प्रामुख्येन विद्यापीठप्राङ्गणे प्रचाल्यमाने अभिमन्युबालकेन्द्रे शताधिका: बाला: संस्कृतभाषादक्षतया सह नैकानि नैतिकमूल्यानि प्राप्नुवन्ति । केन्द्रपक्षत: नैके कार्यक्रमा अपि आयोज्यन्ते ।





तेषु कार्यक्रमेषु विद्यापीठपक्षत: समायोजिते नवरात्रमहोत्सवसन्दर्भे विविधदैनन्दिनोपयुज्यमानानां वस्तूनां संस्कृतनामानि तत्तद्वस्तुप्रदर्शनपूर्वकं **"संस्कृतवस्तुप्रदर्शिनी"** नाम्ना केन्द्रमेकं प्राचाल्यत । प्रदर्शिन्यामस्यां पञ्चाशदधिकद्विशत-(२५०) संख्याकानि वस्तूनि संस्कृतनामभिस्सह स्थापितानि । विद्यापीठे अधीयाना: छात्रा:, अध्यापका:, कर्मचारिणश्च सोत्साहमस्मिन् कार्यक्रमे भागमूद्वा अनुरूपकाणि स्वाभिमतानि प्रायच्छन् ।







मान्या: अतिथय: बालकेन्द्रपक्षत: समायोजित-राधाकृष्णमधुरवेशस्पर्धासु प्राप्तानां शिशुविजेतृणां कृते पुरस्कारधनराशिं प्रयच्छन्त्य: ।

निवृत्तरागस्य गृहं तपोवनम् (A man who does not indulge in mean acts, the home itself is a penance-grove.)



# विद्यापीठे कृष्णजन्माष्टमीमहोत्सव:



बालकेन्द्रपक्षत: विगते अगष्टमासे श्रीकृष्णजन्माष्टमीमहोत्सवसन्दर्भे **ललितवस्त्रधारणस्पर्धा** समायोज्यत । स्पर्धायाम् अस्यां तिरुपतिनगरस्थेभ्य: बहुभ्य: विद्यालयेभ्य: १८६ संख्याका: बालका: बालिकाश्च भागमूढ्वा सुन्दरं मधुरं कोमलं च कृष्णवेशम्, मनोहरं राधिकावेशं च धृत्वा स्वकलाकौशलं प्रादर्शयन् । तेषु एकषष्टिसंख्याका: बाला: पुरस्कृता अभूवन् । स्पर्धासु निर्णायकत्वेन शिवप्रसादवर्य:, श्रीमत्य: प्रसन्नलक्ष्मी:, राजेश्वरी, प्रमीला च आसन् । कार्यक्रमस्य संयोजिका प्रसन्नलक्ष्मी: आसीत् ।

# अभिमन्युबालकेन्द्राणां शिक्षिकाभ्य: प्रशिक्षणवर्ग:

राष्ट्रियसंस्कृतविद्यापीठेन तिरुपतिनगरे विद्यापीठे च संस्कृत-विकासकेन्द्रपक्षत: प्रगतवर्षद्वयात् नैकानि बालकेन्द्राणि प्रचाल्यन्ते इति विदितमेव । तेषु बालकेन्द्रेषु पाठयन्तीनां शिक्षिकाणां पाठनकौशलं विकासयितुं ताभ्य: दिनत्रयात्मक: प्रशिक्षणवर्ग: आयोजित: । अस्य प्रशिक्षणवर्गस्य प्रशिक्षकप्रमुखत्वेन बेङ्गलूरुनगरात् सम्भाषणसन्देश-संस्कृतमासपत्रिकाया: सम्पादका: संस्कृतभारत्या: वरिष्ठा: पूर्णकालिका: **श्रीमन्त: जनार्दनहेगडे महोदया:**, तथा च दत्तात्रेय वज्रल्लि महोदय:, अन्या: प्रशिक्षिका: शारदा, शशिकला, श्रीमती इत्येताश्च समागत्य दिनत्रयं यावत् शिक्षिकाभ्य: अभिनय-गीत-नृत्यादिविभिन्नप्रकारै: उत्तमं प्रक्षिक्षणं दत्तवन्त: । अस्य प्रशिक्षणवर्गस्य उद्घाटनसमारोहे भाषमाणा: विद्यापीठकुलपतय: आचार्य.वि.मुरलीधरशर्ममहाभागा: - बालेषु आत्मविश्वासस्य संवर्धकानि बालकेन्द्राणि एव इत्यत्र नास्ति संशय: ; गतवर्षे (३७) सप्तत्रिंशत्संख्यात्मकानि बालकेन्द्राणि अस्मिन् वर्षे षष्ठ्यधिकानि संजातानि ; एतेषां बालकेन्द्राणां प्रयोजनं सत्फलानि च सर्वेऽपि जना: अद्य पश्यन्ति - इति अवदन् । समारोहेऽस्मिन् संस्कृतविकासकेन्द्रस्य संयोजका: आचार्या: प्रह्लाद आर्.जोशिमहोदया: स्वागतभाषणमकुर्वन् । सहसंयोजकौ परमेश्वर: किरणभट्ट: च व्यवस्थाकल्पने सहकृतवन्तौ ।





महाजनो येन गत: स पन्था: (That is the right pat which is followed by the majority.)

# मानवसंसाधनविकासमन्त्रालयमन्त्रिणां विद्यापीठे पदार्पणम्




महतः हर्षप्रकर्षस्योऽयं विषयो यत् भारतस्य मानवसंसाधन-विकासमन्त्रालयस्य मन्त्रिवर्याः **श्रीयुक्ताः रमेशपोखरियाल "निशङ्क"**महोदयाः गते अगष्टमासस्य चतुर्दशदिनाङ्के (14-08-2019) विद्यापीठस्य महामान्यकुलाधिपतिभिः **श्री नीडामङ्गलं गोपाल-स्वामिमहोदयैः** सह विद्यापीठस्य परमपावनप्राङ्गणे संस्कृतनवरात्र-महोत्सवस्योद्घाटनसन्दर्भे पदार्पणमकुर्वन् । सन्दर्भेऽस्मिन् विद्यापीठे बहूनां नवीनप्रकल्पानामपि समुद्घाटनं तैः विहितम् । यथा —

(१) सि.अन्नारावु-कक्ष्याप्रकोष्ठभवनम्

(२) वेङ्कटाचलबालकच्छात्रावासः

(३) मलिनजलशुद्धीकरणयोजना

(४) अनुवादविभागः (Dept. of Translation)

(५) अभिनयकलाविभागः (Dept. of Performing Arts)

मान्यवरमन्त्रिमहोदयानां संस्कृतनवरात्रमहोत्सवस्य समुद्घाटने अभिभाषणसारः इत्थमासीत् —

अद्याहं प्रमोदमनुभवामि यत् त्रयाणां भवनानां निर्माणसन्दर्भे विद्यापीठस्य परमपावनप्राङ्गणे शिल्यान्यासः विहितः इति । अग्रे अत्र छात्राणां कृते सुन्दरच्छात्रावासः, शिक्षणकक्षाभवनं तथा च दूषितजलपरिष्करणार्थं Sewage Treatment Plant इत्यस्यापि निर्माणं भविष्यति । सर्वकारपक्षतः सन्दर्भेऽस्मिन् ५८ कोटिपरिमितधनराशिव्ययीकरणार्थमङ्गीकारपत्रं प्रदत्तमिति आनन्दस्य विषयः । प्रियतमाः ! छात्राः ! यदा यदा अहं केषुचित्सन्दर्भेषु भवद्भिः सह मिलामि, तदा तदा मम अतीतमहं स्मरामि तदेव भारतं, यद् विश्वगुरुरासीत्, विश्वस्य कृते सर्वश्रेष्ठं नेतृत्वं प्रायच्छत्, यद् द्रष्टुं संसारो व्याकुलः अभूत्, यत्र तक्षशिलानालन्दासदृशाः विश्वविद्यालया आसन्, यत्र संस्कृतेनैव अध्ययनाध्यापनपरम्परा प्रचलिताऽऽसीत् । शास्त्रेषु उच्यते —

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ।।**

विश्वस्य सर्वेऽपि मानवाः ज्ञानार्जनार्थमस्माकं सविधे आगच्छन् । एतदेव गौरवं भवति अस्माकं देशस्य, भाषायाः, अस्माकं ज्ञानस्य, अस्माकं विज्ञानस्य च यत् – सर्वेऽपि इतः भारतात्प्रेरणामवाप्तुं सदा सर्वदा आगच्छन्त आसन्, तदा भावविनिमयस्य माध्यम आसीत् संस्कृतम् । मम सौभाग्यमस्तीदं यत्, अहं तस्याः भूमेरागतोऽस्मि हिमालयात् यत्र संस्कृतस्य जन्माभूत् ।

संस्कृतं सर्वासां भाषाणां जननी इत्युच्यते । संसारस्य सर्वा अपि भाषाः संस्कृतभाषाया एव निःसृताः । यां भाषामवलम्ब्य वयमत्रोपस्थिताः, तस्याः योद्धारो वयं समग्रविश्वभाषाणां नेतारः । भारतदेशे प्रचलितानां द्वाविंशति-भाषाणां शिखरोपरि वर्तते इयं संस्कृतभाषा, यस्याः इतोऽपि विकासः अस्माभिः साधनीयः । आंग्लभाषा भारतीयभाषासु न वर्तते । भारतीयानु-सूचितभाषासु अस्याः गणना न क्रियते । तथाऽपि विश्वस्तरेषु अस्माकं संस्कृतेः प्रचाराय प्रसाराय च विश्वस्य सर्वासां भाषाणामध्ययनं निरर्थकं न भवति । किन्तु, अस्माभिः अस्माकमाधारस्तम्भस्य सशक्तीकरणमपेक्षते । कस्यापि भवनस्य मूलप्रस्तरमाधारशिला वा यदि दुर्बला भवति, तर्हि तद्भवनं यावत्सुन्दरं बृहद्वा भवतु, एकस्मिन्नेव क्षणे नश्यति, स्थातुं च न शक्नोति । इत्थं यथा वयं भवनस्य विषये चिन्तयामस्तथैव व्यक्तेः, समाजस्य, राष्ट्रस्य च विषये आलोचयेम । यो जनः स्वसंस्कृतेः मौलिकीमाधारशीलां न जानाति, संस्कारैस्सह युक्तो न भवति, समाजेन सह न युज्यते, राष्ट्रस्य च विषये न चिन्तयति ; तस्य स्थितिस्तथैव भवति यथा किमपि सूत्रविच्छिन्नं वाताटम् (Cutting Kite), यदाकाशमार्गे डयते, किन्तु तस्य मूलाधारः कुत्रापि न भवति । तथैव मानवोऽपि मूलसंस्कृति-संस्कारविच्छिन्नः स्वीयप्रगतिं नु पश्यति, किन्तु भूमेर्विच्छिन्नः कदा कस्मिन् गर्ते पतिष्यति, तन्न ज्ञायते । अत एव एतदावश्यकं यत् अस्माकं संस्कृतेः मूलमस्माभिः सुदृढं करणीयम्, अस्माभिः भूमावेव स्थित्वा आकाशस्पर्शः करणीयः । यस्यां कस्यामपि दिशि गमिष्यामस्तत्र भारतीयज्ञानं विज्ञानं च स्वीकृत्य गमिष्यामः ।

संस्कृतिसंस्कारविहीनः उपाधिधारी पुरुषः स्थाणुवृक्षसदृशो भवति । यः कदापि न फलं ददाति, न वा पुष्पं विकासयति, अपि च सामान्यपवनप्रवाहेण अधः भूमौ सत्वरं निपतति । यतो हि तस्य भूम्या सह दृढसम्बन्धो न भवति । लघुवृक्षोऽपि दृढमूलेन भूमिबद्धो यदि भवति, कोऽपि चक्रवातः तमुत्पाटयितुं न प्रभवेत् । एतदर्थमेव एतदावश्यकं भवति यत्, अस्माभिः अस्माकं संस्कृतिः इतोऽपि गभीरतां प्रति नेतव्याऽस्ति । एतत्कार्यं संस्कृतच्छात्राणां हस्ते एव वर्तते ।

संस्कृतभाषा वैज्ञानिकी भाषाऽस्ति । सर्वत्र विश्वे अस्याः भाषायाः शोधकार्यं प्रचलति । एषा भाषा तथा लिख्यते, यथा उच्यते ; अथवा तथोच्यते, यथा लिख्यते । यदि भारतं ज्ञातव्यं, तर्हि संस्कृतं ज्ञातव्यम् । चरकेण आयुषो वेदः आयुर्वेदः निर्मितः । सम्पूर्णः संसारः इदानीमायुर्वेदच्छदस्याधो वर्तते । आयुर्वेदं विना कोऽपि बृहच्छिकित्सालयः निराधारः दृश्यते । भास्कराचार्यस्य नवीनसिद्धान्तः, पाणिनेः व्याकरणज्ञानम्, आर्यभट्टस्य नूतनसैद्धान्तिकतत्त्वम्, ऋषेः कणादस्य वैशेषिकं दर्शनम्, एवमेतादृशानाम् ऋषीणां वैज्ञानिकानां च सर्वेऽपि सिद्धान्ताः अग्रे सारणीयाः । सा ऋषिचर्या वर्धापनीया । सर्वेऽपि वैदेशिकाः अस्माकं ज्ञानं विज्ञानञ्च स्वीकृत्यानुसन्धानं कुर्वन्ति ; अनन्तरकाले अस्माकं कृते एव परिवेषयितुमागच्छन्ति । देशस्य





NASA भवदीयमेव विद्यापीठं भवितुमर्हति, यत्र भवादृशाः अनुसन्धातारः संस्कृतभाषावीराः अध्ययनमनुसन्धानं च कुर्वन्ति । यद्विज्ञानमस्माकं समीपे अस्ति, तं विज्ञानं स्वीकृत्य वयमग्रे गमिष्यामः । वयं वदिष्यामः – खगोलशास्त्रे, वास्तुशास्त्रे, प्रौद्योगिकक्षेत्रे, प्रबन्धनक्षेत्रे सर्वत्र वयमग्रे स्मः इति । समग्रसंसारो भवन्तं पश्यति । प्राचीनकालान्नैके वैदिशिकाः भारतमागतवन्तः । यदा वयं दासा आसन्, तदा अंग्रेजशासकानामियमेव धारणाऽऽसीत् यत् —

**युनान-मिशर-रोमा सव मिट गए जाहाँ से ।**
**अवतक मगर है वाकी नामो निशाँ हमारा ।।**

एतदर्थमेव वयं जीवामः, कारणमत्र वयमस्माकं संस्कृतिं न त्यजामः, संस्कारान् विसृजामः । तदर्थमेव संसारस्य सर्वेऽपि चिन्तिताः, यदेतेषां मठमन्दिराणि त्रुटितानि, भवनानि विध्वस्तानि ; तथापि एते जीविताः, न नश्यन्ति । न भवत्येव तथा, यतो हि अस्माकं भारतस्य तादृशी संस्कृतिरस्ति, या अस्माकं देशं विश्वगुरुरूपेण प्रतिष्ठापयति । अस्माकं बृहद्विचारो वर्तते ।

**अयं निजः परो वेति गणना लघुचेतसाम् ।**
**उदारचरितानां तु वसुधैव कुटुम्बकम् ।।**

इति अस्माभिरुच्यते ।

वसुधा सम्पूर्णतया आत्मनः परिवारतुल्या तेनैव अङ्गीक्रियते, यस्य समीपे शक्तिर्भवति । यस्य समीपे बृहद्विचाराः भवन्ति । परन्तु आधुनिककाले सर्वेऽपि प्रगतिशीलाः देशाः संसारं वाणिज्यकेन्द्ररूपेण चिन्तयन्ति । वाणिज्यकेन्द्रेषु व्यापारो भवति परिवारे तु प्रेम भवति ।

"सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ...." इति विचारः हिन्दुस्ताने एव भवति, नान्यत्र । इति ऋषिपरिकल्पनामग्रेसारयितुमिच्छति भारतवर्षम् । एकस्मिन् पक्षे योगो भवति । मनसः तनोश्च आरोग्यं योग उच्यते । विश्वस्य 189 देशाः नरेन्द्रमोदिनः आह्वानेन योगार्थमेकत्रिताः दृश्यन्ते । संस्कृतं समन्वयस्य विज्ञानं प्रादात् । तनुमनोबुद्धीनां समन्वयात्मकं ज्ञानमितः अस्माभिः प्राप्तम् । संसारस्य कृते शान्तेः प्रगतेश्च गीतमस्माभिरेव दत्तम् —

ॐ सहनाववतु सह नौ भुनक्तु सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु मा विद्विसावहै ।
ॐ शान्तिः, शान्तिः, शान्तिः ।।

अस्माकं सविधे सङ्कल्पशक्तेरभावः दृश्यते । अस्माकं सविधे सकलशक्तेराधारः विद्यते । विश्वविद्यालये वेदपुराणोपनिषदां सर्वेक्षणं विज्ञानेन सह क्रियते इति आनन्दस्य विषयः । प्रधानमन्त्रिणां स्वप्नभारतं नवभारतं स्यात्, सशक्तभारतं स्यात्, समृद्धभारतम्, स्वच्छभारतम्, स्वस्थभारतम् तथा च श्रेष्ठभारतं स्यात् इति ।

# मन्त्रिवर्यैः विविधभवनोद्घाटनसन्दर्भे कृताः शिलान्यासाः







मानवसंसाधनविकासमन्त्रालयानुदानेन विद्यापीठप्राङ्गणे तिरुपतिनगरस्य लब्धप्रतिष्ठानां **सि.अन्नारावुमहोदयानां** नाम्ना छात्राणाम् अध्ययनार्थं कक्ष्याप्रकोष्ठभवनम्, श्रीवेङ्कटाचलबालकच्छात्रावासभवनम्, मलिनजलविशुद्धीकरणसंयन्त्रं च निर्मातुं महामान्यमन्त्रिमहोदयानां श्रीयुक्तपोखरियाल-वर्याणां करकमलाभ्यां शिलान्यासः विहितः ।

भवनानामेतेषां निर्माणार्थं मानवसंसाधनविकासमन्त्रालयपक्षतः क्रमशः Rs.27,26,00,000/- (कक्ष्याप्रकोष्ठस्य कृते) ; Rs.29,53,26,628/- (छात्रावासस्य कृते) परिमितधनराशिः उच्चशिक्षावित्तपोषणसंस्था(Higher Education Financing Agency - HEFA) माध्यमेनानुमोदितः । तथा च मलिनजलशुद्धीकरणार्थं Rs.2,31, 96,145/- धनराशिः प्राप्तः । केन्द्रियलोककार्यविभागद्वारा (Central Public Works Department - CPWD) द्वारा एतेषां सर्वेषामपि भवनानां सफलनिर्माणाय प्रस्तावः प्रदत्तः । तत्र शैक्षिकभवने २९ कक्ष्याप्रकोष्ठैः सह अध्यापक-कर्मचारिप्रकोष्ठ-सम्मेलनप्रकोष्ठ-शौचालयाश्च भविष्यन्ति । प्रकाशयोग्योऽयं विषयो यत् **श्री सि.अन्नारावुमहोदयाः** सम्पूर्णतिरुपतिनगरस्य चित्रशिल्पिन आसन् । तेषामेव प्रत्यक्षतत्त्वावधानेन तिरुपतिनगरस्य परिकल्पना कृताऽऽसीत् । तेषां शतवार्षिकमहोत्सवमुपलक्ष्य तिरुपतौ नैके प्रकल्पाः कल्पिताः वर्तन्ते । तदीयस्मृतौ विद्यापीठप्राङ्गणे तेषां नाम्ना कक्ष्याप्रकोष्ठभवनस्योद्घाटनं विद्यापीठस्य कृते गौरवाय कल्प्यते ।

तथैव श्रीवेङ्कटाचलच्छात्रावासः प्रायशः ९००० वर्गक्षेत्रे भूतलेन सह षट्तलविशिष्टभवनं भविष्यति, यत्र षट्षष्ट्यधिकैकशतसंख्याकाः प्रकोष्ठाः निर्मास्यन्ते । तत्रापि रोगिप्रकोष्ठः (Sick Room), अध्ययनकक्षः (Reading Room), मनोरञ्जनप्रकोष्ठः (Recreation Hall), शौचालयः (Toilets), स्नानागारः (Bathrooms) इत्यादीनां व्यवस्था करिष्यते । अत्र पञ्चशताधिकच्छात्राणां निवासव्यवस्था भविष्यति । मलिनजलशुद्धीकरणयन्त्रस्य (Sewage Treatment Plant - STP) सामर्थ्यं प्रतिदिनं १५० KL जलविशुद्धीकरणाय भवति । जलविशुद्धिकरण-समनन्तरमेव अनेन यन्त्रेण भूगर्भजलं विहाय विविध

# मानवसंसाधनविकासमन्त्रालयमन्त्रिणां विद्यापीठे पदार्पणम्




महत: हर्षप्रकर्षस्योऽयं विषयो यत् भारतस्य मानवसंसाधन-विकासमन्त्रालयस्य मन्त्रिवर्या: **श्रीयुक्ता: रमेशपोखरियाल "निशङ्क"**महोदया: गते अगष्टमासस्य चतुर्दशदिनाङ्के (14-08-2019) विद्यापीठस्य महामान्यकुलाधिपतिभि: **श्री नीडामङ्गलं गोपाल-स्वामिमहोदयै:** सह विद्यापीठस्य परमपावनप्राङ्गणे संस्कृतनवरात्र-महोत्सवस्योद्घाटनसन्दर्भे पदार्पणमकुर्वन् । सन्दर्भेऽस्मिन् विद्यापीठे बहूनां नवीनप्रकल्पानामपि समुद्घाटनं तै: विहितम् । यथा —

(१) सि.अन्नारावु-कक्ष्याप्रकोष्ठभवनम्

(२) वेङ्कटाचलबालकच्छात्रावास:

(३) मलिनजलशुद्धीकरणयोजना

(४) अनुवादविभाग: (Dept. of Translation)

(५) अभिनयकलाविभाग: (Dept. of Performing Arts)

मान्यवरमन्त्रिमहोदयानां संस्कृतनवरात्रमहोत्सवस्य समुद्घाटने अभिभाषणसार: इत्थमासीत् —

अद्याहं प्रमोदमनुभवामि यत् त्रयाणां भवनानां निर्माणसन्दर्भे विद्यापीठस्य परमपावनप्राङ्गणे शिल्यान्यास: विहित: इति । अग्रे अत्र छात्राणां कृते सुन्दरच्छात्रावास:, शिक्षणकक्षाभवनं तथा च दूषितजलपरिष्करणार्थं Sewage Treatment Plant इत्यस्यापि निर्माणं भविष्यति । सर्वकारपक्षत: सन्दर्भेऽस्मिन् ५८ कोटिपरिमितधनराशिव्ययीकरणार्थमङ्गीकारपत्रं प्रदत्तमिति आनन्दस्य विषय: । प्रियतमा: ! छात्रा: ! यदा यदा अहं केषुचित्सन्दर्भेषु भवद्भि: सह मिलामि, तदा तदा मम अतीतमहं स्मरामि तदेव भारतं, यद् विश्वगुरुरासीत्, विश्वस्य कृते सर्वश्रेष्ठं नेतृत्वं प्रायच्छत्, यद् द्रष्टुं संसारो व्याकुल: अभूत्, यत्र तक्षशिलानालन्दासदृशा: विश्वविद्यालया आसन्, यत्र संस्कृतेनैव अध्ययनाध्यापनपरम्परा प्रचलिताऽऽसीत् । शास्त्रेषु उच्यते —

**एतद्देशप्रसूतस्य सकाशादग्रजन्मन: ।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवा: ।।**

विश्वस्य सर्वेऽपि मानवा: ज्ञानार्जनार्थमस्माकं सविधे आगच्छन् । एतदेव गौरवं भवति अस्माकं देशस्य, भाषाया:, अस्माकं ज्ञानस्य, अस्माकं विज्ञानस्य च यत् – सर्वेऽपि इत: भारतात्प्रेरणामवाप्तुं सदा सर्वदा आगच्छन्त आसन्, तदा भावविनिमयस्य माध्यम आसीत् संस्कृतम् । मम सौभाग्यमस्तीदं यत्, अहं तस्या: भूमेरागतोऽस्मि हिमालयात् यत्र संस्कृतस्य जन्माभूत् ।

संस्कृतं सर्वासां भाषाणां जननी इत्युच्यते । संसारस्य सर्वा अपि भाषा: संस्कृतभाषाया एव नि:सृता: । यां भाषामवलम्ब्य वयमत्रोपस्थिता:, तस्या: योद्धारो वयं समग्रविश्वभाषाणां नेतार: । भारतदेशे प्रचलितानां द्वाविंशति-भाषाणां शिखरोपरि वर्तते इयं संस्कृतभाषा, यस्या: इतोऽपि विकास: अस्माभि: साधनीय: । आंग्लभाषा भारतीयभाषासु न वर्तते । भारतीयानु-सूचितभाषासु अस्या: गणना न क्रियते । तथाऽपि विश्वस्तरेषु अस्माकं संस्कृते: प्रचाराय प्रसाराय च विश्वस्य सर्वासां भाषाणामध्ययनं निरर्थकं न भवति । किन्तु, अस्माभि: अस्माकमाधारस्तम्भस्य सशक्तीकरणमपेक्षते । कस्यापि भवनस्य मूलप्रस्तरमाधारशिला वा यदि दुर्बला भवति, तर्हि तद्भवनं यावत्सुन्दरं बृहद्वा भवतु, एकस्मिन्नेव क्षणे नश्यति, स्थातुं च न शक्नोति । इत्थं यथा वयं भवनस्य विषये चिन्तयामस्तथैव व्यक्ते:, समाजस्य, राष्ट्रस्य च विषये आलोचयेम । यो जन: स्वसंस्कृते: मौलिकीमाधारशीलां न जानाति, संस्कारैस्सह युक्तो न भवति, समाजेन सह न युज्यते, राष्ट्रस्य च विषये न चिन्तयति ; तस्य स्थितिस्तथैव भवति यथा किमपि सूत्रविच्छिन्नं वाताटम् (Cutting Kite), यदाकाशमार्गे डयते, किन्तु तस्य मूलाधार: कुत्रापि न भवति । तथैव मानवोऽपि मूलसंस्कृति-संस्कारविच्छिन्न: स्वीयप्रगतिं नु पश्यति, किन्तु भूमेर्विच्छिन्न: कदा कस्मिन् गर्ते पतिष्यति, तन्न ज्ञायते । अत एव एतदावश्यकं यत् अस्माकं संस्कृते: मूलमस्माभि: सुदृढं करणीयम्, अस्माभि: भूमावेव स्थित्वा आकाशस्पर्श: करणीय: । यस्यां कस्यामपि दिशि गमिष्यामस्तत्र भारतीयज्ञानं विज्ञानं च स्वीकृत्य गमिष्याम: ।

संस्कृतिसंस्कारविहीन: उपाधिधारी पुरुष: स्थाणुवृक्षसदृशो भवति । य: कदापि न फलं ददाति, न वा पुष्पं विकासयति, अपि च सामान्यपवनप्रवाहेण अध: भूमौ सत्वरं निपतति । यतो हि तस्य भूम्या सह दृढसम्बन्धो न भवति । लघुवृक्षोऽपि दृढमूलेन भूमिबद्धो यदि भवति, कोऽपि चक्रवात: तमुत्पाटयितुं न प्रभवेत् । एतदर्थमेव एतदावश्यकं भवति यत्, अस्माभि: अस्माकं संस्कृति: इतोऽपि गभीरतां प्रति नेतव्याऽस्ति । एतत्कार्यं संस्कृतच्छात्राणां हस्ते एव वर्तते ।

संस्कृतभाषा वैज्ञानिकी भाषाऽस्ति । सर्वत्र विश्वे अस्या: भाषाया: शोधकार्यं प्रचलति । एषा भाषा तथा लिख्यते, यथा उच्यते ; अथवा तथोच्यते, यथा लिख्यते । यदि भारतं ज्ञातव्यं, तर्हि संस्कृतं ज्ञातव्यम् । चरकेण आयुषो वेद: आयुर्वेद: निर्मित: । सम्पूर्ण: संसार: इदानीमायुर्वेदच्छदस्याधो वर्तते । आयुर्वेदं विना कोऽपि बृहच्छिकित्सालय: निराधार: दृश्यते । भास्कराचार्यस्य नवीनसिद्धान्त:, पाणिने: व्याकरणज्ञानम्, आर्यभट्टस्य नूतनसैद्धान्तिकतत्त्वम्, ऋषे: कणादस्य वैशेषिकं दर्शनम्, एवमेतादृशानाम् ऋषीणां वैज्ञानिकानां च सर्वेऽपि सिद्धान्ता: अग्रे सारणीया: । सा ऋषिचर्या वर्धापनीया । सर्वेऽपि वैदेशिका: अस्माकं ज्ञानं विज्ञानञ्च स्वीकृत्यानुसन्धानं कुर्वन्ति ; अनन्तरकाले अस्माकं कृते एव परिवेषयितुमागच्छन्ति । देशस्य





NASA भवदीयमेव विद्यापीठं भवितुमर्हति, यत्र भवादृशा: अनुसन्धातार: संस्कृतभाषावीरा: अध्ययनमनुसन्धानं च कुर्वन्ति । यद्विज्ञानमस्माकं समीपे अस्ति, तं विज्ञानं स्वीकृत्य वयमग्रे गमिष्याम: । वयं वदिष्याम: – खगोलशास्त्रे, वास्तुशास्त्रे, प्रौद्योगिकक्षेत्रे, प्रबन्धनक्षेत्रे सर्वत्र वयमग्रे स्म: इति । समग्रसंसारो भवन्तं पश्यति । प्राचीनकालान्नैके वैदिशिका: भारतमागतवन्त: । यदा वयं दासा आसन्, तदा अंग्रेजशासकानामियमेव धारणाऽऽसीत् यत् —

**युनान-मिशर-रोमा सब मिट गए जाहाँ से ।**
**अवतक मगर है वाकी नामो निशाँ हमारा ।।**

एतदर्थमेव वयं जीवाम:, कारणमत्र वयमस्माकं संस्कृतिं न त्यजाम:, संस्कारान् विसृजाम: । तदर्थमेव संसारस्य सर्वेऽपि चिन्तिता:, यदेतेषां मठमन्दिराणि त्रुटितानि, भवनानि विध्वस्तानि ; तथापि एते जीविता:, न नश्यन्ति । न भवत्येव तथा, यतो हि अस्माकं भारतस्य तादृशी संस्कृतिरस्ति, या अस्माकं देशं विश्वगुरुरूपेण प्रतिष्ठापयति । अस्माकं बृहद्विचारो वर्तते ।

**अयं निज: परो वेति गणना लघुचेतसाम् ।**
**उदारचरितानां तु वसुधैव कुटुम्बकम् ।।**

इति अस्माभिरुच्यते ।

वसुधा सम्पूर्णतया आत्मन: परिवारतुल्या तेनैव अङ्गीक्रियते, यस्य समीपे शक्तिर्भवति । यस्य समीपे बृहद्विचारा: भवन्ति । परन्तु आधुनिककाले सर्वेऽपि प्रगतिशीला: देशा: संसारं वाणिज्यकेन्द्ररूपेण चिन्तयन्ति । वाणिज्यकेन्द्रेषु व्यापारो भवति परिवारे तु प्रेम भवति ।

"सर्वे भवन्तु सुखिन: सर्वे सन्तु निरामया: ...." इति विचार: हिन्दुस्ताने एव भवति, नान्यत्र । इति ऋषिपरिकल्पनामग्रेसारयितुमिच्छति भारतवर्षम् । एकस्मिन् पक्षे योगो भवति । मनस: तनोश्च आरोग्यं योग उच्यते । विश्वस्य 189 देशा: नरेन्द्रमोदिन: आह्वानेन योगार्थमेकत्रिता: दृश्यन्ते । संस्कृतं समन्वयस्य विज्ञानं प्रादात् । तनुमनोबुद्धीनां समन्वयात्मकं ज्ञानमित: अस्माभि: प्राप्तम् । संसारस्य कृते शान्ते: प्रगतेश्च गीतमस्माभिरेव दत्तम् —

ॐ सहनाववतु सह नौ भुनक्तु सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु मा विद्विसावहै ।
ॐ शान्ति:, शान्ति:, शान्ति: ।।

अस्माकं सविधे सङ्कल्पशक्तेरभाव: दृश्यते । अस्माकं सविधे सकलशक्तेराधार: विद्यते । विश्वविद्यालये वेदपुराणोपनिषदां सर्वेक्षणं विज्ञानेन सह क्रियते इति आनन्दस्य विषय: । प्रधानमन्त्रिणां स्वप्नभारतं नवभारतं स्यात्, सशक्तभारतं स्यात्, समृद्धभारतम्, स्वच्छभारतम्, स्वस्थभारतम् तथा च श्रेष्ठभारतं स्यात् इति ।

# मन्त्रिवर्यै: विविधभवनोद्घाटनसन्दर्भे कृता: शिलान्यासा:







मानवसंसाधनविकासमन्त्रालयानुदानेन विद्यापीठप्राङ्गणे तिरुपतिनगरस्य लब्धप्रतिष्ठानां **सि.अन्नारावुमहोदयानां** नाम्ना छात्राणाम् अध्ययनार्थं कक्ष्याप्रकोष्ठभवनम्, श्रीवेङ्कटाचलबालकच्छात्रावासभवनम्, मलिनजलविशुद्धीकरणसंयन्त्रं च निर्मातुं महामान्यमन्त्रिमहोदयानां श्रीयुक्तपोखरियाल-वर्याणां करकमलाभ्यां शिलान्यास: विहित: ।

भवनानामेतेषां निर्माणार्थं मानवसंसाधनविकासमन्त्रालयपक्षत: क्रमश: Rs.27,26,00,000/- (कक्ष्याप्रकोष्ठस्य कृते) ; Rs.29,53,26, 628/- (छात्रावासस्य कृते) परिमितधनराशि: उच्चशिक्षावित्तपोषणसंस्था(Higher Education Financing Agency - HEFA) माध्यमेनानुमोदित: । तथा च मलिनजलशुद्धीकरणार्थं Rs.2,31, 96,145/- धनराशि: प्राप्त: । केन्द्रियलोककार्यविभागद्वारा (Central Public Works Department - CPWD) द्वारा एतेषां सर्वेषामपि भवनानां सफलनिर्माणाय प्रस्ताव: प्रदत्त: । तत्र शैक्षिकभवने २९ कक्ष्याप्रकोष्ठै: सह अध्यापक-कर्मचारिप्रकोष्ठ-सम्मेलनप्रकोष्ठ-शौचालयाश्च भविष्यन्ति । प्रकाशयोग्योऽयं विषयो यत् **श्री सि.अन्नारावुमहोदया:** सम्पूर्णतिरुपतिनगरस्य चित्रशिल्पिन आसन् । तेषामेव प्रत्यक्षतत्त्वावधानेन तिरुपतिनगरस्य परिकल्पना कृताऽऽसीत् । तेषां शतवार्षिकमहोत्सवमुपलक्ष्य तिरुपतौ नैके प्रकल्पा: कल्पिता: वर्तन्ते । तदीयस्मृतौ विद्यापीठप्राङ्गणे तेषां नाम्ना कक्ष्याप्रकोष्ठभवनस्योद्घाटनं विद्यापीठस्य कृते गौरवाय कल्प्यते ।

तथैव श्रीवेङ्कटाचलच्छात्रावास: प्रायश: ९००० वर्गक्षेत्रे भूतलेन सह षट्तलविशिष्टभवनं भविष्यति, यत्र षट्षष्ट्यधिकैकशतसंख्याका: प्रकोष्ठा: निर्मास्यन्ते । तत्रापि रोगिप्रकोष्ठ: (Sick Room), अध्ययनकक्ष: (Reading Room), मनोरञ्जनप्रकोष्ठ: (Recreation Hall), शौचालय: (Toilets), स्नानागार: (Bathrooms) इत्यादीनां व्यवस्था करिष्यते । अत्र पञ्चशताधिकच्छात्राणां निवासव्यवस्था भविष्यति । मलिनजलशुद्धीकरणयन्त्रस्य (Sewage Treatment Plant - STP) सामर्थ्यं प्रतिदिनं १५० KL जलविशुद्धीकरणाय भवति । जलविशुद्धिकरण-समनन्तरमेव अनेन यन्त्रेण भूगर्भजलं विहाय विविध

# अभिनयकला-अनुवादविभागयोः उद्घाटनम्



विद्यापीठे ऐदंप्राथम्येन मान्यकुलपतीनां प्रकल्पनया अनुवादविभागः (Department of Translation), तथा च अभिनयकलाविभागः (Department of Performing Arts) मानवसंसाधनविकास-मन्त्रालयस्य मान्यवरमन्त्रिमहोदयैः श्रीयुक्तपोखरियालमहोदयैः तिरुपतिलोकसभासदस्यानां बल्लिदुर्गाप्रसादरावुमहोदयानां तथा विद्यापीठस्य महामान्यकुलाधिपति-कुलपति-कुलसचिव-सङ्कायप्रमुख-समेतानां विद्यापीठीयकर्मचारिणां समुपस्थितौ संस्कृतनवरात्रसमुद्घाटनसमवसरे उद्घाटितः । अभिनयकलाविभागे नवनियुक्तानां सङ्गीत-नृत्य-वादननिपुणानामध्यापकानां कलापरिवेषणकार्यक्रमः परवर्तिपर्याये समायोजितः । यस्मिन् कार्यक्रमे मान्याः सेवानिवृत्ताः प्रशासनाधिकारिणः **मुक्तेश्वररावमहोदयाः** मुख्यातिथित्वेन समागत्य सङ्गीत-नृत्य-वाद्यानां महत्त्वं प्रतिपाद्य कलानिपुणान् अध्यापकान् अभ्यनन्दत् तथा च एतासु कलासु रुचिं स्थापयितुं छात्रान् प्राबोधयन् ।









# त्रिसप्ततितमः स्वातन्त्र्यदिनोत्सवः



प्रतिवर्षमिव ऐषमोऽपि राष्ट्रियविद्यापीठस्य एस्.बि.रघुनाथाचार्यमुक्ताकाश-सभाङ्गणे राष्ट्रस्य **त्रिसप्तितमः स्वातन्त्र्यदिनोत्सवः** महता वैभवेन समायोजितः । कार्यक्रमेऽस्मिन् विद्यापीठस्य मान्याः कुलपतयः **आचार्य वि.मुरलीधरशर्ममहोदयाः** समुपस्थाय राष्ट्रियध्वजस्य समारोहणमकुर्वन्। स्वीयप्रबोधने "वयं राष्ट्रे जागृयाम", "स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः", "ज्ञान जलों का सभी क्षेत्र में विस्तार करें" इत्येवं नैकानि वैदिकानि, गीतोक्तानि, लौकिकानि च सुभाषितानि समुपस्थाप्य सर्वान् प्राचोदयन् । विद्यापीठं स्वीयं ज्ञानसम्पदं सर्वासु दिक्षु व्यापयितुं भारतस्य विविधविश्वविद्यालयैः सह सम्बन्धं स्थापयितुं प्रयतते । तत्र श्रीवेङ्कटेश्वरचिकित्सा-विज्ञानसंस्था (SVIMS)-श्रीकविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयादयः प्रसिद्धास्सन्ति । अस्य कार्यक्रमस्य सञ्चालकाः शैक्षिकसङ्कायप्रमुखाः आचार्यराणी-सदाशिवमूर्त्तिमहाभागाः आसन् । अन्ये च कुलसचिवसमेताः अन्ये अध्यापकाः, कर्मचारिणः छात्राः अत्र समुपस्थाय कार्यक्रमं सफल्यकुर्वन् । विद्यापीठीयच्छात्रैः सांस्कृतिकसदसः संयोजकानां डॉ.नारायणपूजारमहोदयानां मार्गदर्शनेन संस्कृत-हिन्दी-तेलुगुप्रभृतिभाषाभिः मधुरसङ्गीतपरिवेषणं कृतम् । डॉ.गिरिकुमारमहोदयाः कार्यक्रमस्य सर्वाभिः व्यवस्थाभिः सह अन्ते मिष्टान्नवितरणव्यवस्थामप्यकुर्वन् ।





# पद्मश्रीचमूकृष्णशास्त्रिमहोदयानां विद्यापीठसंदर्शनम्



प्रबोधयन्तः मान्याः शास्त्रिवर्याः

जूलैमासस्य दशमे दिनाङ्के (१०-०७-२०१९) राष्ट्रियसंस्कृत विद्यापीठेन **वर्तमानभविष्यत्कालयोः संस्कृतभाषाविकासः** इत्यंशमधिकृत्य समायोजितायां चर्चागोठ्यां मुख्यातिथिरूपेण नवदेहलीस्थस्य संस्कृतसंवर्धनप्रतिष्ठानस्य कार्यदर्शिनः पद्मश्रीविभूषिताः श्रीमान्तः चमूकृष्णशास्त्रिमहोदयाः समागताः । यत्र च विद्यापीठस्य समस्ताध्यापकगणः भागमगृह्णात् । सन्दर्भेऽस्मिन् शास्त्रिमहोदयाः अवदन् यत्, संस्कृतभाषां सरलतया धाराप्रवाहेण च जनसामान्यान् प्रति नेतुं, संस्कृताध्यापकैः आकर्षकरीत्या सा भाषा पाठनीया । तद्दिशि अध्यापकैः विशिष्टप्रयत्नः करणीयः । संस्कृतं मम भाषा, संस्कृताय एव मम जीवनम् इत्येतादृशी भावना सामाजिकेषु जागरणीया - इति प्राबोधयन् ।

अस्याः गोष्ठ्याः अध्यक्षाः विद्यापीठकुलपतयः आचार्य.वि.मुरलीधरशर्ममहाभागाः अवदन् यत्, इदं विद्यापीठं संस्कृतभाषां जनसामान्यभाषां कर्तुं विभिन्नानां विशिष्टानां च कार्यक्रमाणां सञ्चालनेन अविरलं निरन्तरं च प्रयत्नं करोति । तिरुपतिनगरे षष्ठ्यधिकानि बालकेन्द्राणि, आइ.आइ.टी इत्यादि विज्ञानसंस्थासु संस्कृतशिबिराणां सञ्चानम् इत्यादयः बहवः कार्यक्रमाः अनुष्ठीयमानाः सन्ति - इति ।

# चतसृणां भाषापरिषदां समुद्घाटनम्




राष्ट्रियसंस्कृतविद्यापीठे ऐषमः २०१९-२० शैक्षिकवर्षस्य भाषापरिषदां, याश्च छात्रेषु वक्तृत्वकौशलं सम्पादयितुं सवर्धयितुं च उपकल्पिताः सन्ति, तासां वाग्वर्धिनी परिषत् (संस्कृतम्) अन्नमाचार्य कलापरिषत् (तेलुगु), तुलसीदास् परिषत् (हिन्दी), माक्समुल्लर् परिषत् (आंग्लम्) इत्येतासां चतसृणां भाषापरिषदां समुद्घाटनमहोत्सवः ०२-०८-२०१९ तमे दिनाङ्के शुक्रवासरे सुसम्पन्नः प्रावर्तत । विद्यापीठस्य अन्तर्दौवारिक-क्रीडाङ्गणे सम्प्रवृत्तस्य अस्य समुद्घाटनमहोत्सवस्य मुख्यातिथिरूपेण तिरुमल-तिरुपतिदेवस्थानस्य विशिष्टाधिकारिणः श्रीमन्तः ए.वि.धर्मरिड्डी महाभागाः समुपस्थिताः । एते महोदयाः स्वीयवचोभिः कार्यक्रमे उपस्थितान् छात्रान् उद्दिश्य एवं तान् प्रेरितवन्तः यत् , - अस्माकं संस्कृतिः, सम्प्रदायाः, नामकरणम्, विवाहः, आलयेषु मन्त्रोच्चारणम्, पूजादिकार्यक्रमाः इत्येवमादिषु सर्वत्र स्थानेषु संस्कृतमेव वर्तते । संस्कृतमेव सर्वासां भारतीयभाषाणां मूलभाषा इति मम प्रगाढः विश्वासः । अद्यत्वे देशे विदेशेषु च संस्कृतस्य महत् प्राधन्यं दीयमानमस्ति । अमेरिकास्थ-नासासंस्थायाम्, जर्मनीदेशे च संस्कृतमधिकृत्य नैकविधानि परिशोधनानि प्रचलन्ति । छात्राः भवन्तः संस्कृतभाषायां नैपुण्यं पटुत्वं च सम्पाद्य स्पर्धापरीक्षासु, विशिष्य सिविल्स्-परीक्षासु अग्रेसराः भवेयुः इति मम आशा वर्तते - इत्येवं छात्रान् प्राबोधयन् ।

विद्यापीठस्य कुलपतयः आचर्य.वि.मुरलीधरशर्माणः भाषमाणाः - आध्यात्मिकक्षेत्रं तिरुपतिं संस्कृतभाषायाः केन्द्ररूपेण परिणमयितुम् इदं विद्यापीठं व्यूहप्रणालिकासहितं संसिद्धं वर्तते । आध्यात्मिकतायाः संस्कृतभाषायाः च अविनाभावसम्बन्धः विद्यते । तिरुमलतिरुपतिदेवस्थानस्य सहयोगेन सहकारेण च तत् साधयितुं शक्यते इति, आदौ देवस्थानसम्बन्धिनीषु संस्थासु संस्कृतवातावरणम् उपकल्पनीयम् इति च विज्ञाप्य, विद्यापीठे प्रारब्धाः एताः चतस्रः भाषापरिषदः छात्राणां कृते वक्तृत्वकौशलविकासाय उत्तमाः वेदिकाः भवन्ति इति अवदन् ।

अनन्तरं विद्यापीठस्य कुलसचिवाः आचार्य. जि.यस्.आर्.कृष्णमूर्तिमहाभागाः, वाग्वर्धिनीपरिषदः संयोजकः डा.मुरलीधर रावु महाभागः च परिषदाम् उद्देश्यं प्रतिपादितवन्तः । वाग्वर्धिनीपरिषदः सहसंयोजकौ डा.निरञ्जनमिश्रः, डा. पि.टि.जि.रङ्गरामानुजाचार्यः, अन्नमाचार्यकलापरिषदः संयोजिका डा.वै.विजयलक्ष्मीः, तुलसीदासपरिषदः संयोजिका डा.लता मङ्गेष्कर्, मैक्समुलर्-परिषदः संयोजिका प्रो.वि.सुजाता, अन्ये च अध्यापकाः, कर्मचारिणः, छात्राश्च भागमूढ्वा एनं कार्यक्रमं सुसम्पन्नम् अकुर्वन् ।

# समनुष्ठितं पादपपर्व



सस्यानाम् आरोपणं सस्यसंवर्धनं वृक्षसंरक्षणं च प्रधानम् उद्देश्यं विधाय तिरुपतिस्थविद्यापीठे तृतीयपर्यायं पादपपर्व अत्यन्तं श्रद्धासक्तिभ्यां वैभवेन समाचरितम् । जूलैमासस्य (१ ३) त्रयोदशे दिनाङ्के प्रवृत्ते अस्मिन् शुभकर्मणि विद्यापीठस्य कुलपतिप्रमुखा: मान्या: भागं समूढ्वा, पादपपर्वण: अङ्गत्वेन बिल्व-पलाश-अत्ति-इत्यादीनि देवतुल्यानि सस्यानि समारोपयन् । एवं च अध्यापका:, छात्रा: अन्ये च कर्मचारिण: समधिकसंख्योपेता: समुत्साहिनो भूत्वा (३ ० ०) त्रिशतादपि अधिकानि नैकविधानि सस्यानि आरोपयन् । अस्मिन् प्रसङ्गे विद्यापीठस्य कुलपतय: आचार्य.वि.मुरलीधरशर्माण: भाषमाणा: - समस्तमानवजाते: अस्तित्वस्य हेतुभूता: भवन्ति वृक्षा:, तस्मात् नैरन्तर्येण नूतनानां सस्यानाम् आरोपणं, विद्यमानानां वृक्षाणां संवर्धनं संरक्षणं च अस्माकं गुरुतरं निर्हेतुकं च कर्तव्यम्, विद्यापीठे एतावता एव समारोपितानि नैकानि सस्यानि वृक्षतां गतानि अत्यन्तं स्वच्छं निर्मलं च वायुं प्रयच्छन्ति, विद्यापीठस्य प्राकृतिकीं शोभां च वर्धयन्ति, अस्मात् कारणात् एव नैके बाह्या: सामाजिका: प्रात: सायं च चलनार्थं भ्रमणार्थं च समागत्य अत्रत्यम् आह्लादकरं वातावरणम् आस्वादयन्ति, स्वेषां स्वास्थ्यं च संरक्षन्ति - इत्येवं प्राबोधयन् ।

अस्मिन् कार्यक्रमे विद्यापीठस्य कुलसचिवा: आचार्य.जि.यस्.आर्.कृष्णमूर्तिमहोदया:, छात्रावासाधीक्षका: डा.राधागोविन्दत्रिपाठी, डा. बलिचक्रवर्ती, डा.सच्चिदानन्दमूर्ति:, डा.चन्दूलाल्, डा.विजयलक्ष्मी:, डा.गिरिकुमार:, डा. दक्षिणामूर्ति: अन्ये च कर्मचारिण: छात्राश्च भागम् अगृह्णन् ।

# आगामिकार्यक्रम: (UPCOMING EVENT)

**XXVIII Congress of APTSMS & National Conference on**
**"RECENT TRENDS IN PURE AND APPLIED MATHEMATICS"**

प्रमोदस्य विषयोऽयं यत् तिरुपतिस्थराष्ट्रियसंस्कृविद्यापीठमिदं प्राचीन-अर्वाचीनज्ञानविज्ञानकौशलसम्पादनार्थं प्रतिवर्षमनुसन्धित्सूनां कृते नवीनकार्यक्रमान् आयोज्य स्वप्रतिभां प्रदर्शयितुमवकाशं कल्पयति । अस्मिन् क्रमेऽपि ऐषम: आगामिनि दिसम्बरमासस्य षष्ठदिनाङ्कात् प्रारभ्य अष्टमदिनाङ्कं यावत् (6th to 8th Dec. 2019) गणितविभागपक्षत: "साम्प्रतिकविचारधारायां शुद्धानुप्रयुक्तगणितशास्त्रम्" इति विषयमाधारीकृत्य त्रिदिवसीयराष्ट्रियसम्मेलनस्यायोजनं भविष्यति । आन्ध्रप्रदेश-तेलङ्गाणगणितविज्ञानसमाज: (Andhra Pradesh and Telangana Society for Mathematical Science) तथा राष्ट्रियसंस्कृतविद्यापीठम् इत्यनयो: संयुक्ततत्त्वावधानेन समायोजयिष्यमाणेऽस्मिन् सम्मेलने भागग्रहणार्थं सर्वेऽपि विद्वांस: नवम्बरमासस्य दशमदिनाङ्काभ्यन्तरे स्वीय-शोधपत्रसारांशं विलिख्य प्रेषयितुं निवद्यन्ते । अत्र आलोच्यबिन्दव: अधोलिखिता: भवन्ति —

Algebra, Computational Fluid, Dynamics, Differential Equations, Image Processing, Mathematical Mdeling, Internet Traffic Modeling and Performance, Evaluation of Internet Router, Operation Research, Fuzzy Algebra, Numerical Analysis, Fluid Mechanics, ODE & PDE, Mathematical Physics, Coding Theory, Probability and Statistics, Discrete Mathematics Graph Theory, Near-rings, Number Theory, Dynamical System, Real/Complex Analysis, Cryptography, Bio-Mechanics, Reliability, Ring Theory, Elasticity, Vague Algebra, Vedic Mathematics, Jyotisham, Optimization Techniques, Modeling and simulation.



सम्मेलनायोजनसचिव:
**डॉ.ए.चन्दुलाल:,**
विभागाध्यक्ष:, गणितविभाग:,
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:
सम्पर्कसूत्रम् - 8332890050





# अनूदितपुस्तकसमीक्षा

**मूलग्रन्थ: — "कोई मुश्किल नहीं" (डॉ.रमेशपोखरियाल"निशङ्क"कृत: हिन्दीकवितासंग्रह:)**
**संस्कृतानुवाद: — "किमपि दुष्करं नहि" (डॉ.जि.एस्.आर्.कृष्णमूर्त्ति:)**
**(ISBN - 978-81-937648-9-3 )**



राजनीतिं साहितीं च समतया गृहीत्वा गच्छन् दक्षिणोऽपि डॉ.रमेशपोखरियाल: "निशङ्क:" उत्तराखण्डप्रदेशस्य पूर्वमुख्यमन्त्री तथावर्तमान: हरिद्वारक्षेत्रात् लोकसभासदस्योऽपि (सांसद:) मान्यवरमानवसंसाधनविकासमन्त्रालयमन्त्रिवर्य: विराजते । अस्य लेखनीत: अद्य यावत् उपपञ्चाशत् काव्यसंग्रहा: कथानिका: उपन्यासाश्च प्रकाशिता: । अस्य साहित्यरचना: आंग्ल-फ्रेंच-रष्या-जर्मन्-नेपालीत्यादिषु विदेशीयभाषासु तथा तमिल-तेलुगु-कन्नड-संस्कृतमराठीप्रभृतिषु भारतीयभाषासु अनूदिता: । देश-वैदेशिकविश्वविद्यालयेषु अस्य साहित्ये परिशोधनकार्यमपि चलति । उत्कृष्टसाहित्यसर्जनाय समग्रस्य राष्ट्रस्य त्रिभि: पुरस्कारै: राष्ट्रपतिना पुरस्कृतोऽयं कवि: । अस्यैव कविवरस्य हिन्दीभाषायां विरचित: पञ्चसप्ततिसंख्याकहिन्दीपद्यकदम्बसम्भृत: "**कोई मुश्कल नहीं**" इति ग्रन्थोऽन्यतम: ।

अस्यैव ग्रन्थस्य संस्कृतेनानुवाद: विहित: अस्माकं विद्यापीठस्य मान्यै: कुलसचिवै: साहित्यविभागाचार्यै: आचार्य जि.एस्.आर्.कृष्णमूर्त्तिमहोदयै: । अनूदितस्यास्य "**किमपि दुष्करं नहि**" इति शीर्षकोपेतस्य ग्रन्थस्य प्रकाशनं स्वस्तिश्रीविकारिश्रावणपूर्णिमापूर्वसन्ध्यायां 14.08.2019 तमे दिनाङ्के राष्ट्रियसंस्कृतविद्यापीठपक्षत: समभूत् । ग्रन्थेऽस्मिन् सर्वदा पोखरियालनिशङ्कमहोदयस्य कवितासु विश्वासोऽयं जागर्ति यत्साहित्यं मनुजं परिवर्तयितुमेका अद्भुतकला । य: कोऽपि साहितीसङ्गपिपासु: तत्सम्पर्केण स्वयं परिवर्तते, शीलेन स्वीयजीवनेन च । तथा इतरानपि परिवर्तयति । "आपदो भवन्तु वा विद्युतो लसन्तु वा, आयुधानि भूरिशोऽपि मस्तके पतन्तु वा, सादरं समीहताम्", "न्याय्यात्पथ: प्रविचलन्ति पदं न धीरा:" इत्यादिसदाशयान् प्रकटयन्त्य: निशङ्ककविता: अबोधशिशूनपि समाकर्षति । ग्रन्थोऽयमतपि "कोई मुश्किल नहीं" (किमपि दुष्करं नहि) इति नाम्ना सर्वान् सम्प्रेरयति लक्ष्योन्मुखान् ।

मानसिकावर्जकवचोविन्यासै: बौद्धिकस्तरानुगुणं कविताधारेयं रसनिर्झरी गुणगुम्फिता सुमार्गा अलङ्कारभरिता च प्रतीयते । कवितासंग्रहे प्रकृते: विकरालस्वरूपम्, दीनजनताया: संवेदनम्, जीवनमूल्यम्, देशभक्ति:, समस्तजनताया: आशाकिरणसम्भावनम् इत्यादय: नैके गुणा: विलसन्ति । कविताया: पक्षद्वये हृदयपक्षं बुद्धिपक्षं च समकाले समाकलय्य काव्यसौन्दर्यं विकासयति काव्यरत्नमिदम् । अत्र रसाप्रधानं शब्दगुम्फनम्, अर्थगाम्भीर्यम्, प्रसन्नमाधुर्यम्, ओजस्विता, शब्दालङ्कारसंयोजनम्, अर्थालङ्कारगभीरिमा, क्वचिद्वैदर्भीरीत्यनुरञ्जनम्, गौडीरीतिप्रभञ्जनम्, पाञ्चालीप्रपञ्चनम्, कोमलावृत्तिसंवर्तनम्, ग्राम्यवृत्त्यनुसरणञ्च सर्वै: परिलक्ष्यते, परिशील्ये आस्वाद्यते च । अनूदितधाराया: कानिचनोदाहरणानि अत्र प्रदीयन्ते मान्यानां कृष्णमूर्त्तिमहोदयानां सहृदयहृदयावर्जकतया —

**निशङ्कवर्याणां मूलपाठ:**

तूफान आने पर भी बुझे न,
तुह्मे तो दिया आज ऐसा जलाना,
संकल्प लेकर बढो तो सही,
कोई मुश्किल नहीं स्वर्ग धरती पर पाना ।
हर विजेता को मिली हे हर चुनौती
हर चुनौती को मज़ा कुछ और ही है,
जीतने के बाद भी यदि गम रहा तो
सोच लो, उसकी रज़ा कुछ और ही है ।।




**मूर्त्तिमहोदयानामनुवाद:**

झञ्झायां जातायामपि निर्वापितं न हि
ते दत्तमद्य एवं ज्वालयेत्,
सङ्कल्पं स्वीकृत्य वर्धसे यदि
किमपि दुष्करं न हि स्वर्गं धरायां लब्धुम् ।
सर्वविजेतारो लभन्ते प्रत्यभिग्रहं
प्रतिप्रत्यभिग्रहं कोऽपि विनोद: अन्योऽपि
पश्चात् जयत: मार्गो भवति
चिन्तय तस्य च मधुरं किञ्चित् ।

# नवनियुक्तय:


**Dr. K. Viswanatha**
Professor in Nyaya (UR)


**Dr. Shivaram Ramakrishna Bhat**
Associate Professor in Research and Publications (UR)


**Dr. Pankaj Kumar Vyas**
Associate Professor in Vyakarana (UR)


**Shri Gopesh Kumar Sharma**
Assistant Professor in Vyakarana (PWD-OH)


**Dr. M.G. Nandana Rao**
Assistant Professor in Translation **(EWS)**


**Dr. K. Kumar**
Assistant Professor in Translation (SC)

**DEPARTMENT OF COMPUTER SCIENCE**


**Dr. B. Chandrasekharam**
Associate Professor (UR)


**Dr. M. Mary Sujatha**
Assistant Professor (SC)


**Dr. G. Nagalakshmi**
Assistant Professor (SC)


**Shri M.A. Adarsh**
Assistant Professor in Performing Arts – Dance (OBC)


**Dr. V. Balasubramanyam**
Assistant Professor in Music (Indian Classical Vocal) – Dept. of Education (UR)


**Dr. Hans Prabhakar Ravi Das**
Assistant Professor in Performing Arts – Instrumental Music (SC)

## DEPARTMENT OF EDUCATION

**Assistant Professors in Sanskrit Education (Sanskrit Teaching Methodology)**


**Ms. S. Vaishnavi (UR)**


**Dr. A. Shekar Reddy (UR)**


**Dr. M. Dattatraya Sharma (UR)**


**Dr. S. Lakshmi Seetha Rama Sarma (UR)**


**Dr. Kumar Bagewadimath (UR)**


**Dr. G. Uma Narasimha Murthy (OBC)**


**Dr. P. Madhava Rao (OBC)**


**Mr. Aloke Mondal (SC)**

**Assistant Professor in Sanskrit Education (Hindi Teaching Methodology)**


**Mr. Jayanta Nuniya (SC)**


**Dr. A. Charukesh (OBC)**

**Assistant Professor in Sanskrit Education (Teaching Methodology)**


**Dr. Laxman Kumar** (SC) **(Sanskrit Teaching)**


**Dr. M. Adenna Naik (ST) (Telugu Teaching)**


**Dr. Vedaprakash Prabhakar Borker**
Assistant Professor in Hindi (SC)


**Dr. Sujatha Munukutla**
Assistant Professor in Sahitya (OBC)

## DEPARTMENT OF YOGA


**Dr. R. Lakshmi Narayana**
Assistant Professor in Yoga (UR)


**Shri K.C.S. Lokeshwar**
Assistant Professor in Yoga(OBC)


**Dr. Tapan Kumar Ghadai**
Assistant Professor in Yoga and Meditation (UR)


**Shri Rahul Kumar Sharma**
Assistant Professor in Yogic Science (ST)


**Dr. T. Shivakumar**
Assistant Professor in Yogic Science (OBC)


**Dr. Krishna Kumar Bhargav**
Assistant Professor in Vasthu (OBC)


**Dr. Chittaranjan Nayak**
Assistant Professor in Jyotisha (OBC)


**Dr. V. Dharmadasan**
Assistant Professor in Vasthu (Ancient Indian Management) (OBC)

**नवनियुक्तेभ्य: सर्वेभ्य: आचार्य-सहाचार्य-सहायकाचार्येभ्य: विश्वविद्यालयपक्षत: शेमुषीपक्षतश्च अभिनन्दनानि विज्ञाप्यन्ते ।**





# राष्ट्रियसेवायोजनापक्षत: समायोजिता: कार्यक्रमा:



## "राष्ट्रियसेवायोजनादिवसस्य स्वर्णजयन्तीमहोत्सव:"

विद्यापीठस्य राष्ट्रियसेवायोजनाकेन्द्रत: नैके समाजोपयोगिन: कार्यक्रमा: प्रचाल्यन्ते । तेषु कार्यक्रमेषु गते सितम्बरमासे चतुर्विंशतितमे दिनाङ्के (24/09/2019) केन्द्रस्य सप्तसम्भागै: **"राष्ट्रियसेवायोजनादिवसस्य स्वर्णजयन्तीमहोत्सव:"** साडम्बरं पर्यपाल्यत । अवसरेऽस्मिन् विद्यापीठस्य मान्या: कुलपतय: आचार्य वि.मुरलीधरशर्ममहोदया: मुख्यातिथिरूपेण समुपागत्य जीवनेऽस्माकं सेवाधर्मस्य वैशिष्ट्यमाविरकुर्वन् तथा च छात्रचरित्रनिर्माणे अस्य कियन्ती भूमिका वर्तते तदस्मारयन् । जनसेवा सदा सर्वदा मानवस्योत्तमं कार्यं भवतीति "मानवसेवा माधवसेवा" इति सूक्ते: प्राधान्यं प्रबोधयन्त: श्रीशर्ममहोदया: संस्कृतभाषायामस्या: स्पन्दनं प्रत्यपादयन् । अत: संस्कृतविद्यापीठे अधीयाना: सर्वेऽपि छात्रा: अस्य धर्मस्य व्रतिन: स्युरिति प्राचोदयन् । राष्ट्रियसेवायोजनाया: संयोजका: आचार्यसत्यनारायणमहोदया: Power Point Presentation माध्यमेन योजनाया अस्या: विविधकार्यक्रमाणां विषये सूचनां प्रायच्छन् । कार्यक्रमेऽस्मिन् आदौ डॉ.ओ.जि.पि.कल्याणशास्त्री योजनाया: तृतीयसम्भागस्य



कार्यनिर्वाहाधिकारी सर्वेषां स्वागतमकार्षीत् । तथा च द्वितीयसम्भागाधिकारिण: डॉ.आर्.चन्द्रशेखरमहोदया: धन्यवादान् समार्पयन् । सर्वेषामपि सप्तसम्भागानां निर्वाहाधिकारिण:, विद्यापीठाध्यापका:, कर्मचारिण:, छात्राश्च अस्मिन् समुपस्थाय कार्यक्रमं सफल्यकुर्वन् । अस्य कार्यक्रमस्याङ्गभूततया अष्टाविंशतितमे दिनाङ्के "स्वच्छभारताभियानम्" इत्यंशे सेवाव्रतिन: विद्यापीठस्य सेवायोजनास्वयंसेवका: छात्रा: प्रात:काले विद्यापीठक्रीडाप्रान्तर-कर्मचारिप्रासादपरिसर-छात्रावासपरिसरादिपरिष्करणकार्याणि समपादयन् ।




### योजनाया: प्रथमसम्भावस्य नवनियुक्ताधिकारी



विद्यापीठस्य गणितविभागस्य विभागाध्यक्ष: डा.ए.चन्दुलालमहोदय: राष्ट्रियसेवायोजनाया: प्रथमसम्भावस्य (1st Unit) कार्यनिर्वाहकाधिकारिरूपेण (Programme Officer) नूतनतया **11.07.2019** तमे दिनाङ्के नियुक्त: ।



# विद्यापीठप्रकाशनानि










एतानि सर्वाण्यपि पुस्तकानि "किमपि दुष्करं नहि" इति अनूदितग्रन्थेन सह मान्यैः मानवसंसाधनविकाससमन्त्रालयमन्त्रिभिः श्रीरमेशपोखरियाल-"निशङ्क"महोदयैः संस्कृतनवरात्रमहोत्सवोद्घाटनसमये उन्मोचितानि

## *English Reader*
## FACILITATING COMMUNICATION : THE WAY

editey by **PROF.S.MOHAN RAJ** and **PROF.JAYASHREE MOHAN RAJ**, authored by **PROF.V.SUJATHA** and **PROF. R.DEEPTA** is an innovative and task based English Reader for the two year Prak-Shastri Course. The Syllabus for this course has been drafted based on the contemporary theories of language teaching.

It is designed to meet the requirements of Sanskrit students who have very little communicative competence and whose exposure to English is minimal. It serves as a foundation course at the undergraduate level. The contents of this book is as follows - (i) Describing people (ii) Describing objects and places (iii) Making requests, seeking help and polite requests (iv) Inviting, congratulating and thanking people (v) Describing events (vi) Giving instructions & describing a process (vii) Listening passages (viii) Extensive Reading.

समाजस्य पुरोगतौ समस्यानां परिष्कारे समाधानरूपनूतनाविष्करणरूपाणां शोधकार्याणाम् विशेषप्रतिपत्तिलक्ष्यकाणां गवेषणां विधाय विविधविशेषज्ञानां परिश्रमाणां लोकार्पणाय शास्त्रसंरक्षणदीक्षादक्ष-राष्ट्रियसंस्कृतविद्यापीठपक्षतः सहृदयहृदयरञ्जनी शोधपत्रिका

## "महस्विनी"

स्वीये एकादशकुसुमस्य प्रथमसम्पुटे पञ्चदशशोधलेखैः सह **आचार्य कोराडसूर्यनारायणमहोदयैः** सम्पादिता प्रकाशतां नीता । यत्र त्रयः आंग्ललेखाः (1-Acharya Kautilya on Corruption, 2-The Kamadogdhree Commentary on Suryasiddhanta of Sri Tammayajvan, 3-Atharvavedic References to Gems) तथा द्वादश संस्कृतलेखाः (१-वैखानसशुल्बसूत्रम्, २-प्राच्यविदुषां चिन्तनेषु मनोवैज्ञानिकतत्त्वानां विचारः, ३-श्रीमद्भगवद्गीताऽऽयुर्वेदशास्त्रयोः व्यक्तित्वप्रकाराः, ४-अलङ्कारशास्त्रे लोकन्यायाः, ५-औचित्यं विश्वव्यवहारहेतुः, ६-समाजे आश्रमधर्मस्य प्रासङ्गिकता, ७-"ककुद्मन्तः"इति पदविषयकसाध्वसाधुविचारः, ८-आरुण्यस्य क्रयसाधनत्वम्, ९-दिङ्निर्णयविमर्शः, १०-अग्निपुराणे वृक्षचिकित्सा, ११-नैषधीयचरिते राजनयः, १२-अधिकारवादः (विवेकानन्दस्य नव्यवेदान्तानुसारम्) प्रतन्यन्ते ।

राष्ट्रियसंस्कृतविद्यापीठे प्रचाल्यमानानां शैक्षिक-सांस्कृतिक-तदितरकार्यक्रमाणां विवरणात्मिका संस्कृताङ्ग्लभाषाद्वयोपेता वृत्तपत्रिका भवति

## "शेमुषी"

अस्याः पञ्चदशभागस्य प्रथमसम्पुटं २०१८ वत्सरस्य दिसम्बरमासात्प्रारभ्य २०१९ वत्सरस्य जुन्-मासं यावत् विद्यापीठप्राङ्गणे विहितानां कार्यक्रमाणां वृत्तैस्सह : **डॉ.सोमनाथदाशवर्येण** सम्पादितं प्रकाशितञ्चाभूत्, यत्र प्रामुख्येन मूलाम्नाश्रीकाञ्चीकामकोटिपीठाधीश्वराणां विद्यापीठपदार्पणम्, विशिष्टानामतिथीनां विद्यापीठसन्दर्शनम्, सम्माननम्, द्वाविंशः दीक्षान्तसमारोहः, त्रयोदशाखिलभारतीय-छात्रप्रातिभसमारोहः, उत्कलदिवसः, जयदेवसाहित्यसङ्गोष्ठी, विश्व AIDS दिवसः, पट्टाभिराम-शास्त्रिव्याख्यानमाला, अन्ताराष्ट्रियदिव्याङ्गदिवसः, राष्ट्रियमानवाधिकारदिवसे चर्चासत्रम्, वेदभाष्यकार्यशाला, बाबासाहेव डॉ.भीमराव अम्बेदकरजयन्ती, साहित्यशास्त्रीयद्विदिवसीयसङ्गोष्ठी, अध्यपकप्रशिक्षणकार्यक्रमः, अखिलभारतीयशास्त्रार्थप्रशिक्षणम्, श्रीरामानुजप्रकल्पकार्यशाला, ग्रीष्मकालिकयोगचिकित्साशिबिरम् इत्यादिभिः विषयैः सह विश्वविद्यालयस्य अध्यापकानां कर्मचारिणां च विविधस्तरेषु प्राप्तयशसां विषये बहुधा सूचनाः प्रदत्ताः सन्ति ।





# श्रावणोत्सवः - २०१९

लोके सर्वत्र केरलीयाः सन्त्येव । अतः केरलीयानामुत्सवेषु मुख्यः श्रावणोत्सवः नानादेशेषु श्लाघ्यते । अयमुत्सवः केरलीयैः पुष्परङ्गवल्या, विशेषपूजादिभिः विशेषभोजनव्यवस्थया, गीत-नृत्य-क्रीडादिभिश्च आचार्यते । प्रतिवर्षमिव अस्मिन् वर्षेऽपि विद्यापीठे तत्प्रान्तीयैः छात्रैः "ओणम्" इति नाम्ना प्रसिद्धोऽयं श्रावणोत्सवः महता वैभवेन पर्यपाल्यत ।



तस्मिन्नवसरे विद्यापीठीयाः नानादेशात् समागताः छात्राः अध्यापकाः, समीपवासिन्यश्च तत्र उपस्थिता आसन् । विद्यापीठे अस्मिन् संवत्सरे त्रिंशदधिकाः केरलीयच्छात्राः विद्यापीठे पठन्ति । ते सर्वेऽपि सामोदं मिलित्वा अस्योत्सवस्यायोजनमकार्षुः । त्रिंशत्तमे दिनाङ्के शैक्षिकभवनस्य पुरोभागे अस्योत्सवस्य औद्योगितमुद्घाटनं समभूत् । उद्घाटनञ्च विद्यापीठस्य मान्यैः कुलसचिवैः प्रो.जि.एस्.आर्.कृष्णमूर्त्तिमहोदयैः विहितं तथा शैक्षिकसङ्काय-प्रमुखैः आचार्यराणी- सदाशिवमूर्त्तिमहाभागैः आशंसाभाषणं प्रदत्तम् । सभायाः अध्यक्षाः ज्योतिषविभागाध्यक्षाः प्रो.वि.उन्निकृष्णन् नम्पियातिरिमहोदयाः आसन् । अपि च डा.कृष्णेश्वरझामहोदयैरपि आशंसावचांसि उक्तानि । २८-२९ दिनाङ्कयोः बालकानां तथा बालिकानां च कृते विविधस्पर्धा आसन् । तत्र ये विजयं प्राप्तवन्तः प्राप्तवत्यो वा तेभ्यस्ताभ्यश्च कृते पुरस्कारवितरणं विशिष्टातिथिभिः कृतम् । एवं केरलीयबालिकाभिः विशिष्टं तिरूवातिराकेलिनामकं प्रसिद्धं नृत्यरूपं प्रदर्शितम् । अन्तिमे पायसमाधुर्येण कार्यक्रमः सुसम्पन्नः ।





ओणममहोत्सवसन्दर्भे विद्यापीठे अध्यापनरतैः ज्योतिषविभागाचार्यैः आचार्य केरलवास्तव्यैः उन्निकृष्णनम्पियातिरिमहोदयैः सत्कृताः कुलसचिवाः आचार्य जि.एस्.आर्.कृष्णमूर्त्तिमहोदयाः, सङ्कायप्रमुखाः आचार्याः राणीसदाशिवमूर्त्तिमहाभागाश्च ।।




## अभिनन्दनानि

साहित्यविभागाचार्याः मान्याः प्रो.सत्यनारायणाचार्याः पुरीस्थश्रीनीलाचलतत्त्वसन्धानपरिषदः एकविंशे वार्षिकोत्सवे (08.09.2019) प्राबन्धिकसम्मानार्थं "तत्त्वदर्शी" इत्योपाधिना विभूष्यन्ते । तत्र आचार्यगोपालकृष्णदाश-डॉ.भास्करमिश्र-डॉ.श्रीनिवासाचार्यप्रमुखाः वरिष्ठाः श्रीजगन्नाथसंस्कृतिगवेषकाः तथा ओडिशासाहित्याकादम्या अध्यक्षाः श्रीहरिहरमिश्रमहोदयास्समुपस्थिता आसन् ।

दुर्बोधानां संस्कृतशास्त्राणाम् अत्यन्तसरलरीत्या अवगमनार्थं सरलभाषया वैज्ञानिकपद्धत्या च रचिता: शास्त्रप्रवेशिनीग्रन्था: । इमे छात्राणां कृते पठनार्थम् अध्यापकानां च कृते अध्यापनार्थम् उत्तमकरदीपिका: भवन्ति ।



## मीमांसाशास्त्रप्रवेशिनी

(प्रथम: भाग:)

सम्पादक: - आचार्य: का.ई.देवनाथन्

प्रणेता - डॉ.श्रीराम: ए.एस्.

ग्रन्थेऽस्मिन् (प्रथमे भागे) महर्षिणा जैमिनिना प्रणीतस्य मीमांसादर्शनस्य दुर्बोध्यविषया: विविधेषु पाठेषु विभज्य प्रयोजन-पाठ-पाठसार-अभ्यास-परियोजनादिभि: सुष्ठु उपन्यस्ता: । दर्शनपरिचय:, अष्टौ प्रमाणानि, द्रव्यादिप्रमेया:, मीमांसाशास्त्रकारा: इत्यादय: विषया: प्राधान्येन सङ्कलिता: ।



## मीमांसाशास्त्रप्रवेशिनी

(द्वितीय: भाग:)

सम्पादक: - आचार्य: का.ई.देवनाथन्

प्रणेता - डॉ.श्रीराम: ए.एस्.

ग्रन्थेऽस्मिन् (द्वितीये भागे) प्रयोजन-पाठ-पाठसार-अभ्यास-परियोजनादिभिस्सह अष्टसु परिच्छेदेषु अङ्गत्व-प्रयुक्ति-अधिकार-अतिदेश-ऊह-बाध-तन्त्र-प्रसङ्गादय: नैके विषया: प्राधान्येन सङ्कलिता: । मीमांसाशास्त्र-जिज्ञासूनां कृते ग्रन्थद्वयं प्राथमिकस्तरे सरलं सुबोध्यं च भवति ।



## संस्कृतव्याकरणशास्त्रप्रवेशिनी

(प्रथम: भाग:)

सम्पादक: - आचार्य: जे.रामकृष्ण:

रचयित्री - डॉ.शिवकुमारी काटूरि

ग्रन्थेऽस्मिन् प्राथमिकस्तरे संस्कृत-व्याकरण-शास्त्राध्ययनार्थं सन्धि-कारक-समासानां विषये सरलभाषया विषया: उपन्यस्ता: । ग्रन्थोऽयं त्रिभि: प्रकरणै: विभक्त: । प्रतिप्रकरणं नैके पाठा: सन्ति । पाठस्यादौ प्रयोजनं, तत: पाठस्य सार: प्रोच्यते । पाठेन सह सर्वत्र अभ्यास: प्रदत्तोऽस्ति । एतेन पठितु: तत्तत्पाठसम्बन्धिनी सूक्ष्मा बुद्धि: संवर्धते ।



## संस्कृतसाहित्यशास्त्रप्रवेशिनी

(प्रथम: भाग:)

सम्पादक: -

आचार्य: जि.एस्.आर्.कृष्णमूर्त्ति:

रचयिता - डॉ.सिहेच्.नागराजु:

ग्रन्थेऽस्मिन् सरलया भाषया निर्विवादसंवादै: साहित्यशास्त्रस्य परिचय:, इतिहासपुराणानि, पञ्चमहाकाव्यानि, गद्यकाव्यम्, चम्पूकाव्यम्, पञ्च महानाटकानि, अलङ्कारशास्त्रस्य आचार्या:, काव्यप्रमेयविषया इति अष्टौ खण्डा: विद्यन्ते । एतेषु त्रयस्त्रिंशत्पाठा: सन्ति । बहुविधै: अभ्यासै: सह विषयाणां सरलभाषया उपस्थापनाऽत्र प्राप्यते ।



## अद्वैतवेदान्तशास्त्रप्रवेशिनी

रचयिता

आचार्य एम्.सायिरामसुब्रह्मण्यशर्मा

अनुलेखक: - डॉ.श्रीराम: ए.एस्.

अस्मिन् ग्रन्थे १९ पाठा: सन्ति । क्रमशोऽत्र पुरुषार्थ-वेद-दर्शन-अनुबन्ध-वेदान्त-ब्रह्म-माया-दृग्दृश्यपदार्थ-सूक्ष्मभूतोत्पत्ति-सूक्ष्मशरीर-पञ्चीकरण-स्थूलशरीरोत्पत्ति-प्रलय-अध्यारोप-अपवाद-अध्यास-वृत्तिं-महावाक्य-मुक्त्यादिविचारा: सरलतया सचित्रसारण्यादिभि: प्रस्तुतास्सन्ति ।

विद्यापीठस्य कृते गौरवावहोऽयं विषयो यत्
प्रकाशितेषु एतेषु ग्रन्थेषु केचन
कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयसदृशै: नैकैरनुष्ठानै:
विविधासु कक्ष्यासु प्राथमिकस्तरे कोमलमतिच्छात्राणां
सहज-सरल-सुबोध्यतया च तत्तच्छास्त्रेषु
मौलिकज्ञानाभिवर्धनाय पाठ्यक्रमाङ्गतया योजिता: ।
विद्वन्मान्यै: अध्यापकैरपि शैलीयमात्मसात्कृता ।
एतान् अतिरिच्य अन्येऽपि ग्रन्था:
शास्त्रान्तरेषु अचिरात् प्रकाशयिष्यन्ते ।



प्रकाशक:
आचार्य जि.एस्.आर्.कृष्णमूर्त्ति:
कुलसचिव:

सम्पादक:
डॉ.सोमनाथ दाश:
सहायकाचार्य:, अनुसन्धानप्रकाशनविभाग:



वार्तासङ्कलक:, रागि वेङ्कटाचारी, अतिथि-अध्यापक:

Dear Readers !
Your suggestions are solicited to improve the qaulity of our newsletter.
Please send your views or feed back to the Editors mail editorssemushi@gmail.com
Editor SEMUSHI